श्रीमदन्नम्भट्टप्रणीतः

तर्कसंग्रहः

पदकृत्य-हिन्दीटीका-सहितः

अनुवादकः सम्पादकश्च

श्रीकृष्णमणित्रिपाठी

तर्कसंग्रहः

तर्कसंग्रहः

पदकृत्य हिन्दी टीका-सहित

सम्पादक

श्रीकृष्णमणि त्रिपाठी

भू०पू० अध्यक्ष, पुराणविभाग,

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

मोतीलाल बनारसीदास

दिल्ली, मुम्बई, चेन्नई, कलकत्ता, बंगलौर,

वाराणसी, पुणे, पटना

पुनर्मुद्रण : वाराणसी, १९८३
पुनर्मुद्रण : दिल्ली, १९९१, २०००

© मोतीलाल बनारसीदास

मोतीलाल बनारसीदास
४१ यू०ए० बंगलो रोड, जवाहर नगर, दिल्ली ११० ००७
२३६ नाइंथ मेन III ब्लाक, जयनगर, बंगलौर ५६० ०११
सनाज प्लाजा, १३०२ बाजीराव रोड, पुणे ४११ ००२
८ महालक्ष्मी चैम्बर, वार्डेन रोड, मुम्बई ४०० ०२६
१२० रायपेट्टा हाई रोड, मैलापुर, चेन्नई ६०० ००४
८ केमेक स्ट्रीट, कलकत्ता ७०० ०१७
अशोक राजपथ, पटना ८०० ००४
चौक, वाराणसी २२१ ००१

मूल्य : रु० १५

नरेन्द्रप्रकाश जैन, मोतीलाल बनारसीदास, बंगलो रोड, जवाहरनगर, दिल्ली ११० ००७
द्वारा प्रकाशित तथा जैनेन्द्रप्रकाश जैन, श्री जैनेन्द्र प्रेस,
ए-४५ नारायणा, फेज-१, नई दिल्ली ११० ०२८ द्वारा मुद्रित

तर्कसंग्रहः

पदकृत्य-हिन्दीटीका-सहितः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

पदकृत्यम्

श्रीगणेशं नमस्कृत्य पार्वतीशंकरं परम् ।
मया चन्द्रजसिंहेन क्रियते पदकृत्यकम् ॥
यस्मादिदमहं मन्ये बालानामुपकारकम् ।
तस्माद्धितकरं वाक्यं वक्तव्यं विदुषा सदा ॥

विश्वेशम्=जगत्कर्तारं श्रीसाम्बमूर्तिम्, हृदि=मनसि, निधाय=नितरां धारयित्वा, गुरुवन्दनं च विधाय=कृत्वेत्यर्थः । बालेति । अत्राधीत-व्याकरण-काव्य-कोषोऽनधीतन्यायशास्त्रो बालः । व्यासादावतिव्याप्ति-वारणायानधीतन्यायेति । स्तनन्धयेऽतिप्रसक्तिवारणायाधीतव्याकरणेति । सुखेति । सुखेन=अनायासेन, बोधाय=पदार्थतत्वज्ञानायेत्यर्थः । तर्क्यन्ते प्रमितिविषयीक्रियन्ते इति तर्काः=द्रव्यादिपदार्थाः, तेषां संग्रहः=संक्षेपेणोद्देशलक्षणपरीक्षा यस्मिन् स ग्रन्थः । नाममात्रेण वस्तुसंकीर्त्तनम् उद्देशः यथा—द्रव्यम्, गुणः इति । असाधारणधर्मो लक्षणम् । यथा गन्धवत्त्वं पृथिव्याः । लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा । अत्र उद्देश्यस्य फलं पक्षज्ञानम्, लक्षणस्य इतरभेदज्ञानम्. लक्षणे दोषपरिहारः परीक्षायाः फलमिति मन्तव्यम् ।

मैं अन्नंभट्ट हृदय में भगवान् विश्वनाथ का ध्यानकर तथा गुरुदेव की वन्दना कर व्याकरण काव्य कोष आदि को पढ़े हुए एवं न्यायशास्त्र को न पढ़े हुए लोगों को सरलता से न्यायशास्त्र के पदार्थों का ज्ञान कराने के लिए तर्कसंग्रह नामक ग्रन्थ बना रहा हूँ ।

पदार्थाः कति, कानि च तेषां नामानि ?

द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया-ऽभावाः सप्त पदार्थाः ।

वैशेषिक न्याय के मत में पदार्थ ७ माने गये हैं—द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, और अभाव ।

कति द्रव्याणि कानि च तानि ?

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

पदकृत्यम्

तत्रेति । तत्र=सप्तपदार्थमध्ये इत्यर्थः । द्रव्याणि नवैवेत्यन्वयः । एवं तत्रेति पदम् 'चतुर्विंशतिर्गुणाः' इत्यनेनाप्यन्वेति । द्रव्यत्वजातिमत्त्वम्, गुणवत्त्वम्, समवायिकारणत्वं वा द्रव्यसामान्यलक्षणम् ।

इन द्रव्यादि सात पदार्थों में पृथ्वी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा और मन ये ९ द्रव्य हैं ।

कति गुणाः, के च ते ?

रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख - दुःखेच्छा-द्वेषप्रयत्न-धर्माऽधर्म-संस्काराश्चतुर्विंशतिर्गुणाः ।

रूप, रस, गन्ध, स्पर्श, संख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म और संस्कार ये २४ गुण कहलाते हैं ।

कियन्ति कर्माणि, कानि च तानि ?

उत्क्षेपणाऽपक्षेपणाऽऽकुञ्चन - प्रसारण-गमनानि पञ्च कर्माणि ।

उत्क्षेपण (ऊपर की ओर फेंकना),अपक्षेपण (नीचे की ओर फेंकना) आकुञ्चन (समेटना), प्रसारण (फैलाना) और गमन (चलना)--ये ५ कर्म हैं।

सामान्यं कतिविधम् ?

परमपरं चेति द्विविधं सामान्यम् ।

पदकृत्यम्

परमपरं चेति । परसामान्यमपरसामान्यमित्यर्थः । परत्वं च अधिकदेशवृत्तित्वम् । अपरत्वं न्यूनदेशवृत्तित्वम् ।

सामान्य २ प्रकार का है–पर सामान्य और अपर सामान्य । अधिक देश में जो रहता है वह 'पर सामान्य' कहलाता है, जैसे द्रव्यत्वसामान्य । थोड़े देश में जो रहता है वह 'अपर सामान्य' कहलाता है, जैसे 'पृथिवीत्वसामान्य' ।

कति विशेषाः ?

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

'विशेष' केवल नित्य द्रव्यों में रहते हैं और वे अनेक प्रकार के हैं। (पृथिवी, जल, तेज, वायु के परमाणु तथा आकाश, काल, दिशा, आत्मा और मन ये ९ नित्य द्रव्य कहलाते हैं)।

समवायः कतिविधः ?

समवायस्त्वेक एव ।

'समवाय' (नित्य सम्बन्ध) एक ही है । जैसे घट का घटत्व समवाय ।

अभावः कतिविधः ?

अभावश्चतुर्विधः—प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति ।

'अभाव' ४ प्रकार के हैं—प्रागभाव, प्रध्वंसाभाव, अत्यन्ताभाव और अन्योन्याभाव ।

पृथिव्याः किं लक्षणं, कति च भेदाः ?

तत्र गन्धवती पृथिवी । सा द्विविधा नित्याऽनित्या च ।

नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा-शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।

पदकृत्यम्

तत्रेति। तदेव हि लक्षणं यत् अव्याप्ति-अतिव्याप्ति-असम्भवरूपदोषत्रयशून्यम्। यथा गोः सास्नादिमत्त्वम्। अव्याप्तिश्च लक्ष्यैकदेशावृत्तित्वम्। अत एव गोः न कपिलत्वं लक्षणम् तस्य अव्याप्तिग्रस्तत्वात्। अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम्। अत एव गोः न शृङ्गित्वं लक्षणम्, तस्य अतिव्याप्तिग्रस्तत्वात्। असम्भवश्च लक्ष्यमात्रावृत्तित्वम्। यथा गोः एकशफवत्त्वं न लक्षणम्, तस्य असम्भवग्रस्तत्वात्। नित्येति। ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् नित्यत्वम्। ध्वंसेऽतिव्याप्तिवारणाय ध्वंसभिन्नेति विशेषणम्। घटादावतिव्याप्तिवारणाय विशेष्यदलम्। ध्वंसप्रतियोगित्वम्,प्रागभावप्रतियोगित्वं वा अनित्यत्वम्। यद् भोगायतनं तदेव शरीरम्, चेष्टाश्रयो वा। इन्द्रियमिति। चक्षुरादावतिव्याप्तिवारणाय गन्धग्राहकमिति। कालादावतिप्रसक्तिवारणाय इन्द्रियमिति। विषय इति। शरीरेन्द्रियभिन्नत्वे सति उपभोगसाधनं विषयः। शरीरादावतिव्याप्तिनिरासाय सत्यन्तम्। परमाण्वादावतिव्याप्तिवारणाय विशेष्यदलम्। कालादिवारणाय जन्यत्वे सति इत्यपि बोध्यम्।

जिसमें समवाय सम्बन्ध से गन्ध रहता है उसे पृथिवी कहते हैं। यह पृथिवी दो प्रकार की है—नित्य और अनित्य। नित्य पृथिवी वह है—जो परमाणु रूप है और घट-पट आदि कार्यरूप अनित्य पृथिवी है। पुनः इस कार्यरूप अनित्य पृथिवी के भी तीन भेद हैं—शरीर, इन्द्रिय और विषय। हम लोगों का शरीर पार्थिव शरीर है। गन्ध को ग्रहण करने वाली घ्राणेन्द्रिय पार्थिव इन्द्रिय है, जो नासिका के अग्रभाग में रहती है। मृत्तिका, पत्थर, घट आदि पदार्थ पार्थिव-विषय हैं।

जलस्य किं लक्षणं, तस्य च कति भेदाः ?

शीतस्पर्शवत्य आपः । ता द्विविधाः—नित्या अनित्याश्च । नित्याः परमाणुरूपाः, अनित्याः कार्यरूपाः । पुनस्त्रिविधाः—शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।

पदकृत्यम्

शीतेति । तेज आदावतिव्याप्तिवारणाय शीतेति । आकाशेऽतिव्याप्तिवारणाय स्पर्शेति । कालादावतिप्रसक्तिवारणाय समवायसम्बन्धेनेति पदं देयम् । इन्द्रियमिति । त्वगादावतिव्याप्तिवारणाय रसग्राहकमिति । रसनेन्द्रियरससन्निकर्षादौ अतिव्याप्तिनिरासाय इन्द्रियमिति । सरिदिति । आदिना तडागहिमकरकादीनां संग्रहः ।

जिस द्रव्यका स्पर्श शीतल (ठण्डा) हो वह जल कहलाता है । वह जल २ प्रकार का है—नित्य और अनित्य । परमाणुरूप जल नित्य है और कार्यरूप जल अनित्य है । पुनः वह कार्यरूप जल, शरीर इन्द्रिय और विषय के भेद से तीन तरह का है । वरुण लोक में निवास करने वालों का शरीर जल का है । जीभके अग्रभाग पर रहकर मधुर आदि रसों को ग्रहण करने वाली इन्द्रिय 'रसना' है और वही जलीय इन्द्रिय है । नदी, तालाब, समुद्र आदि जलीय विषय हैं ।

तेजसः किं लक्षणं तस्य च कति भेदाः ?

उष्णस्पर्शवत्तेजः तच्च द्विविधम्—नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं—शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः—भौमदिव्योद-

योकरजभेदात् । भौमं वह्न्यादिकम् । अदिव्यनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरुदर्यम् । आकरजं सुवर्णादि ।

पदकृत्यम्

'उष्णे'ति । जलादावतिव्याप्तिवारणाय उष्णेति । कालादवतिप्रसङ्गवारणाय 'समवायसम्बन्धेन' इति पदं देयम् । इन्द्रियमिति । घ्राणादौ अतिव्याप्तिवारणाय रूपग्राहकमिति । कालादौ अतिव्याप्तिनिरसनाय इन्द्रियमिति । भेदात् इति पदं प्रत्येकमभिसम्बध्यते । भौममिति । आदिपदेन खद्योतगततेजः प्रभृतेः परिग्रहः । विद्युदादीति । आदिना अर्कचन्द्रादीनां परिग्रहः । भुक्तस्य=अन्नादेः, पीतस्य जलस्य परिणामः=जीर्णता, तस्य हेतुः उदर्यमित्यर्थः । सुवर्णेति । आदिना रजतादिपरिग्रहः ।

जिस द्रव्य में उष्ण (गरम) स्पर्श हो वह 'तेज' कहलाता है । वह तेज भी २ तरह का होता है—नित्य और अनित्य । परमाणुरूप तेज नित्य है और कार्यरूप (वह्नि आदि) तेज अनित्य है । पुनः कार्य रूप अनित्य तेज शरीर, इन्द्रिय और विषय के भेद से ३ तरह का है । तैजस-शरीर सूर्यलोक में प्रसिद्ध है । रूप का ज्ञान कराने वाली चक्षुरिन्द्रिय जो कि नेत्र के अन्दर काली पुतली (कृष्णतारा) के अग्रभाग में रहती है वही तैजस-इन्द्रिय है । तैजस विषय चार प्रकार का है—भौम, दिव्य, उदर्य और आकरज । अग्नि आदि 'भौम तेज' हैं; क्योंकि वह भूमि से उत्पन्न होता है । जल से प्रादुर्भूत होने वाली बिजली 'दिव्य तेज' है । खाई हुई चीजों को पचाने वाली पेट की अग्नि 'उदर्य तेज' है । खानों से उत्पन्न सुवर्ण, रजत आदि 'आकरज तेज' है ।

वायोः किं लक्षणं तस्य च कति भेदाः ?

रूपरहितस्पर्शवान् वायुः । स द्विविधः—नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तः-

सञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते।

पदकृत्यम्

रूपेति। घटादिवारणाय विशेषणम्। आकाशादिवारणाय विशेष्यम्। इन्द्रियमिति। चक्षुरादिवारणाय स्पर्शग्राहकमिति। कालादावतिव्याप्ति-वारणाय इन्द्रियमिति। वृक्षेति। आदिपदेन जलादिपरिग्रहः। शरीरान्त-रिति। महावाय्वादावतिव्याप्तिवारणाय विशेषणम्। मन आदिवारणाय विशेष्यम्। धनञ्जयवारणाय सञ्चारीति। उपाधीति। मुखनासिकाभ्यां निर्गमनप्रवेशनात् प्राणः। जलादेरधोनयनादपानः। भुक्तपरिणामाय जाठरानलस्य समुन्नयनात् समानः। अन्नादेरूर्ध्वनयनात् उदानः। नाडीमुखेषु वितननात् व्यानः इति क्रियारूपोपाधि-भेदात् तथा व्यवह्रियत इत्यर्थः।

जो द्रव्य रूपरहित हो और स्पर्शवान् हो वह 'वायु' कहलाता है। वह वायु २ तरह का है—नित्य और अनित्य। नित्य वायु परमाणुस्वरूप है और अनित्यवायु कार्यस्वरूप है। पुनः कार्यरूप अनित्य वायु भी शरीर, इन्द्रिय और विषय भेद से ३ तरह का है—वायवीय शरीर वायु लोक में है। वायवीय इन्द्रिय त्वगिन्द्रिय है जो समस्त शरीर में है और जिससे उष्ण, शीतल आदि स्पर्श का ज्ञान होता है। वृक्ष आदि हिलाने वाली वायु 'विषय' है। शरीर के अन्दर घूमने वाली वायु को 'प्राण' कहते हैं। वस्तुतः वह एक ही है, किन्तु हृदय, उदर, आदि स्थानों में रहने के कारण पाँच प्रकार की मानी जाती है, जैसे प्राण-वायु, अपान-वायु, समान-वायु-उदान-वायु और व्यान-वायु।

आकाशस्य किं लक्षणं, कतिविधं च तत् ?

शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।

पदकृत्यम्

शब्देति। शब्दो गुणो यस्य तत्तथा। असम्भववारणाय शब्दगुणो-भयम्। विभ्विति सर्वमूर्त्तद्रव्यसंयोगि।

जिसमें समवायसम्बन्ध से शब्दरूप गुण रहे उसे 'आकाश' कहते हैं। वह आकाश एक है, व्यापक है और नित्य है। संक्षेप में खाली जगह का नाम आकाश है।

कालस्य किं लक्षणं, कतिविधश्च सः ?

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।

पदकृत्यम्

अतीतेति। अतीत इत्यादिः यो व्यवहारः 'अतीतः भविष्यन् वर्त्तमानः' इत्यात्मकः, तस्य असाधारणहेतुः काल इत्यर्थः। ननु इदं लक्षणम् आकाशेऽतिव्याप्तम्, व्यवहारस्य शब्दात्मकत्वात् इति चेत्, न अत्र हेतुपदेन निमित्तहेतुविवक्षणात्। न च एवमपि कण्ठताल्वाद्यभिघातेऽतिव्याप्तिरिति वाच्यम्, विभुत्वस्यापि निवेशात्।

अतीत आदि (भूत-भविष्य और वर्तमान) व्यवहार के निमित्त कारणद्रव्य को 'काल' कहते हैं। यह काल भी एक है, सर्वव्यापक है और नित्य है।

दिशः किं लक्षणं, कतिविधा च सा ?

प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।

पदकृत्यम्

प्राच्येति। इयं प्राची, इयम् अवाची, इयम् प्रतीची, इयं उदीची इत्यादिव्यवहारासाधारणं कारणं दिक् इत्यर्थः। हेतुर्दिक् इत्युच्यमाने परमाण्वादौ अतिव्याप्तिः स्यात् तद्वारणाय प्राच्यादिव्यवहारहेतुरिति। आकाशादिवारणाय असाधारणेत्यपि बोध्यम्।

जो पूर्व, पश्चिम, दक्षिण और उत्तर के व्यवहार का असाधारण कारण हो उसे दिशा कहते हैं। वह दिशा भी एक है, नित्य है और सर्वव्यापक है। वस्तुतः दिशा एक ही है, पर उपाधिभेद से ४, ८ या १० मानी जाती हैं।

आत्मनः किं लक्षणं, कतिविधश्च सः ?

ज्ञानाधिकरणमात्मा। स द्विविधः—जीवात्मा परमात्मा

च। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

पदकृत्यम्

ज्ञानेति। भूतलादिवारणाय ज्ञानेति। कालादिवारणाय समवायेन इत्यपि ज्ञेयम्। ईश्वर इति। समवायसम्बन्धेन नित्यज्ञानवान् ईश्वरः। जीव इति। सुखादिसमवायिकारणं जीव इत्यर्थः।

समवायसम्बन्ध से जिसमें ज्ञान रहता हो उसे 'आत्मा' कहते हैं। वह आत्मा दो तरह का है, एक-जीवात्मा और दूसरा परमात्मा। परमात्मा-ईश्वर सर्वज्ञ और एक है, किन्तु जीवात्मा प्रत्येक शरीर में भिन्न-भिन्न व्यापक और नित्य होता है।

पदकृत्यम्

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।

सुखेति। आत्ममनःसंयोगादिवारणाय इन्द्रियमिति। चक्षुरादिवारणाय सुखेति।

जिस (इन्द्रिय) से सभी प्रकार के सुख-दुःखों की उपलब्धि (ज्ञान) होती हो उसे मन कहते हैं। मन प्रत्येक जीवात्मा के साथ सम्बद्ध होने से भिन्न-भिन्न है। अतः वह अनन्त है, परमाणुरूप है और नित्य है।

रूपस्य किं लक्षणं, कतिविधं च तत् ?

चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात्सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले भास्वरशुक्लं तेजसि।

पदकृत्यम्

चक्षुर्मात्रेति । रूपत्वादिवारणाय गुणपदम् । रसादिवारणाय चक्षुर्ग्राह्य इति । संख्यादिवारणाय मात्रपदम् । यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य विवक्षणीयतया तत एव संख्यादिवारणं सम्भवतीति मात्रपदं व्यर्थम्, तथापि सांसिद्धिकद्रवत्ववारणाय तत् आवश्यकम् । वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वस्य विवक्षणीयतया विशेषपदं न देयम् । त्र्यणुकादिवारणाय गुणपदन्तु देयमेव । सप्तेति । रूपमित्यनुषज्यते ।

आँखों से जिस गुण का प्रत्यक्ष हो उसे 'रूप' कहते हैं । वह रूप पृथिवी, जल और तेज में रहता है । पृथिवी में शुक्ल आदि सातों प्रकार का रूप रहता है । जल में अभास्वर शुक्ल रूप (बिना चमकवाला) है और तेज में भास्वर शुक्ल (चमकीला) है ।

रसस्य किं लक्षणं, कतिविधश्च सः ?

रसनाग्राह्यो गुणो रसः । स च मधुराम्ल-लवण-कटु-कषायतिक्त-भेदात् षड्विधः । पृथिवीजलवृतिः, तत्र पृथिव्यां षड्विधः । जले मधुर एव ।

पदकृत्यम्

रसनेति । रसत्वादिवारणाय गुण इति । रूपादावतिव्याप्तिवारणाय रसनेति । तत्रेति । पृथिवीजलयोरित्यर्थः । षड्विधः इति । अत्र रस इत्यनुवर्त्तते ।

जिस गुणका रसनेन्द्रिय (जीभ) से प्रत्यक्ष हो वह 'रस' कहलाता है । वह रस मधुर, अम्ल, लवण, कटु, कषाय और तिक्त भेद से ६ प्रकार का है । रस पृथिवी और जलमें रहता है । पृथिवी में ६ प्रकार का रस है और जल में केवल मधुर रस ही है । (जलमें अन्य रसोंकी प्रतीति उपाधिभेद से होती है ।)

गन्धस्य किं लक्षणं, कतिविधश्च सः ?

घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।

पदकृत्यम्

घ्राणेति। गन्धत्वादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय घ्राणग्राह्य इति। पृथिवीति। पृथिवीसम्बन्धसत्त्वे गन्धप्रतीतिसत्त्वम्। पृथिवीसम्बन्धाभावे गन्धप्रतीत्यभाव इत्यन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव जले प्रतीतिर्बोध्या। एवं वायौ अपि। ननु देशान्तरस्थे-कस्तूरीकुसुमसम्बद्धपवनस्य एतद्देशे सत्त्वेऽपि पृथिवीसम्बन्धाभावात् गन्धप्रतीत्यनुपपत्तिः। न च वाय्वानीतत्र्यणुकादिसम्बन्धोऽस्त्येव इति वाच्यम्, कस्तूर्यां न्यूनतापत्तेः, कुसुमस्य च सच्छिद्रत्वापत्तेः, इति चेत्? न,भोक्तृदृष्टविशेषेण पूर्ववत् त्र्यणुकान्तराद्युत्पत्तेः कर्पूरादौ तु तदभावान्न तथात्वम् इति।

जिस गुणका घ्राणेन्द्रिय (नाक) से प्रत्यक्ष हो उसे 'गन्ध' कहते हैं। वह गन्ध सुगन्ध और दुर्गन्ध भेद से २ तरह का है और केवल पृथिवी में ही रहता है। (जलादि में भी पृथिवीकी गन्ध की ही प्रतीति होती है)।

स्पर्शस्य किं लक्षणं, के च भेदाः ?

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।

पदकृत्यम्

त्वगिन्द्रियेति। स्पर्शत्वादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय त्वगिन्द्रियेति। संख्यादिवारणाय मात्रपदम्। तत्रेति। पृथिव्यादिचतुष्टये। शीत इति=शीतस्पर्शः, उष्ण इति=उष्णस्पर्शः।

जिस गुणका केवल त्वगिन्द्रिय (त्वचा) से प्रत्यक्ष होता हो वह 'स्पर्श' कहलाता है। स्पर्श तीन प्रकारका है—शीत (ठंडा), उष्ण (गरम) और

अनुष्णाशीत (न अधिक ठंडा न अधिक गरम)। पृथिवी, जल, तेज और वायु इन चारों में स्पर्श रहता है। जलमें शीतस्पर्श, तेजमें उष्णस्पर्श, पृथिवी एवं वायुमें अनुष्णाशीत स्पर्श है।

रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र ?

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्राऽपाकजं नित्यमनित्यं च। नित्यगतं नित्यम। अनित्यगतमनित्यम्।

पृथिवी में रूप, रस, गन्ध और स्पर्श चारों प्रकारके गुण पाकज (तेजके संयोग से उत्पन्न होनेवाले) हैं तथा अनित्य हैं। जल में रहनेवाले रूप, रस, स्पर्श, तेज में रहनेवाले रूप, स्पर्श एवं वायु में रहनेवाला स्पर्श अपाकज हैं तथा नित्य और अनित्य दोनों हैं। नित्यगत (जल आदि के परमाणु में रहनेवाले) रूप, रस, स्पर्श नित्य हैं और अनित्यगत (घट-पटादि कार्य में रहनेवाले) अनित्य हैं।

संख्यायाः किं लक्षणम्, कुत्र च सा वर्तते ?

एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।

पदकृत्यम्

एकत्वादीति। एकत्वम् इत्यादिर्यो व्यवहारः—एको द्वौ बहव इत्याद्यात्मकः तस्य हेतुः संख्या इत्यर्थः। घटादिवारणाय एकत्वादीति। कालादिवारणाय असाधारणेत्यपि देयम्। ननु संख्याया अवधिः अस्ति न वा इत्यत आह एकत्वादिति। तथा च—

एकं दश शतं चैव सहस्रमयुतं तथा।
लक्षं च नियुतं चैव कोटिर्बुदमेव च॥

वृन्दं खर्वो निखर्वश्च शंखः पद्मश्च सागरः ।
अन्त्यं मध्यं पराद्धं च दशवृद्धया यथाक्रमम् ।।

इति महदुक्तेः पराद्धं पर्यन्तैव संख्या इति भावः ।

जो एक, दो, तीन आदि गणना-व्यवहार का कारण हो उसे 'संख्या' कहते हैं । संख्या पृथिवी आदि नवों द्रव्यों में रहती है और एक से परार्ध पर्यन्त मानी जाती है । एकत्व संख्या २ प्रकार की होती है—नित्य और अनित्य । नित्यगत (पृथ्वी जल तेज और वायु के परमाणु तथा आकाशादि नित्य पदार्थों में रहनेवाला) एकत्व नित्य है और अनित्य (घट आदि पदार्थों में रहनेवाला) एकत्व अनित्य है । परन्तु द्वित्वादि से लेकर परार्धपर्यन्त संख्या सर्वत्र अनित्य ही है ।

परिमाणस्य किं लक्षणं, के च तस्य भेदाः ?

मानव्यवहारासाधारणं कारणं परिमाणम् । नवद्रव्यवृत्ति। तच्चतुर्विधम्—अणु, महत्, दीर्घं, ह्रस्वं चेति ।

पदकृत्यम्

मानेति । मानम् परिमितिस्तस्या यो व्यवहारः इदम् महत् इदम् अणु इत्याद्यात्मकः तस्य कारणम् परिमाणमित्यर्थः । दण्डादिवारणाय मानेति । कालादिवारणाय असाधारणेति । शब्दत्ववारणाय कारणमिति । नवद्रव्येति । चतुर्विधम् । अपि परममध्यभेदेन द्विविधम । तत्र परमाणु-ह्रस्वत्वे परमाणुमनसोः मध्यमाणुह्रस्वत्वे द्व्यणुके, परममहत्त्वदीर्घत्वे गगनादौ, मध्यममहत्त्वदीर्घत्वे घटादौ । एतन्मौक्तिकात् इदं मौक्तिकम् अणु इति व्यवहारस्य अपकृष्टमहत्त्वाश्रयत्वाद् गौणत्वं बोध्यम् । एकमेव केतनाद् व्यजनं ह्रस्वम् इत्यत्रापि निकृष्टदीर्घत्वाद् गौणत्वम् ।

जो एक हाथ; दो हाथ, एक सेर, दो सेर इत्यादि नापने और तौलने के व्यवहार का प्रधान कारण हो उसे 'परिमाण' कहते हैं । वह नवों द्रव्यों में रहता है और अणु (अत्यन्त छोटा), महत् (बड़ा), (लम्बा) और ह्रस्व (नाटा) भेद से ४ प्रकार का है ।

पृथक्त्वस्य किं लक्षणम् ?

पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।

पदकृत्यम

पृथगिति । अयमस्मात् पृथगिति यो व्यवहारः तस्य कारणं पृथक्त्वमित्यर्थः । दण्डादिवारणाय पृथगित्यादि । कालादिवारणाय असाधारणेति । पृथग्व्यवहारत्ववारणाय कारणमिति ।

'यह इससे भिन्न है'—इत्यादि व्यवहार का प्रधान कारण 'पृथक्त्व' है। यह पृथक्त्व भी नवों द्रव्यों में रहता है ।

संयोगस्य किं लक्षणं कुत्र च वर्त्तते सः ?

संयुक्तव्यवहारहेतुः संयोगः सर्वद्रव्यवृत्तिः ।

पदकृत्यम्

संयुक्तेति । इमौ संयुक्तौ इति यो व्यवहारः तस्य हेतुः संयोग इत्यर्थः । दण्डादिवारणाय संयुक्तव्यवहारेति । कालादिवारणाय असाधारणेत्यपि देयम् । संयुक्तव्यवहारत्वेऽतिप्रसक्तिवारणाय हेतुरिति । उपदर्शितलक्षणचतुष्टयेऽसाधारणपदं देयम् । क्वचित् पुस्तके परिमाणपृथक्त्वलक्षणे ईश्वरेच्छादिवारणाय असाधारणेति दृश्यते, तत्तु आधुनिकैर्न्यस्तमिति बोध्यम् ।

ये दोनों पदार्थ परस्पर सम्मिलित हैं इत्यादि व्यवहार के असाधारण कारण को 'संयोग' कहते हैं। वह संयोग भी नवों द्रव्यों में रहता है ।

विभागस्य किं लक्षणं कुत्र च तिष्ठति सः ?

संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

पदकृत्यम्

संयोगेति । संयोगनाशजनक इत्यर्थः । कालेऽतिप्रसक्तिवारणाय गुणपदम् । ईश्वरेच्छादिवारणाय असाधारणेत्यपि बोध्यम् । ननु असाधारणपदोपादाने गुणपदस्य वैयर्थ्यं स्यादिति चेन्न, क्रियायाम् अतिप्रसक्तिवारणाय तस्यापि आवश्यकत्वात् ।

संयोग के नाश करनेवाले गुण को विभाग कहते हैं। यह नवों द्रव्यों में रहता है।

परत्वाऽपरत्वयोः कानि लक्षणानि, के च भेदाः ?

पराऽपरव्यवहाराऽसाधारणकारणे परत्वाऽपरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे—दिक्कृते, कालकृते, च। दूरस्थे दिक्कृतं परत्वम्, समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्, कनिष्ठे कालकृततमपरत्वम्।

पदकृत्यम्

परापरेति। परव्यवहारासाधारणकारणं परत्वम् अपरव्यवहारासाधारणकारणम् अपरत्वमित्यर्थः। दण्डादिवारणाय परव्यहारेति कालादिवारणाय असाधारणेति। परव्यवहारत्ववारणाय कारणेति। एवमेव द्वितीयेऽपि बोध्यम्।

'यह पर (दूर) और यह अपर (नजदीक) है' इस व्यवहार के असाधारण कारणको 'परत्व' और 'अपरत्व' कहते हैं। ये (परत्व-अपरत्व) 'पृथिवी, जल, तेज, वायु और मन में रहते हैं। ये भी २ तरह के हैं—(१) दैशिक परत्व और दैशिक अपरत्व एवं (२) कालिक परत्व और कालिक अपरत्व। दूरस्थ घटादि पदार्थों में दैशिक परत्व है, और समीपस्थ पदार्थों में दैशिक अपरत्व है। ज्येष्ठ (बड़े) में कालिकपरत्व है और कनिष्ठ (छोटे) में कालिक अपरत्व है।

गुरुत्वस्य किं लक्षणम् ?

आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्तिः।

पदकृत्यम्

आद्यपतनेति। दण्डादिवारणाय असमवायीति। रूपादिवारणाय पतनेति। वेगेऽतिव्याप्तिवारणाय आद्येति।

प्रथम पतन के असमवायिकारणभूत गुणको गुरुत्व (भारीपन) कहते हैं। यह पृथिवी और जल में रहता है।

द्रवत्वस्य किं लक्षणं, के च भेदाः ?

आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्तिः। तद द्विविधम्–सांसिद्धिकं, नैमित्तिकं च। सांसिद्धिकं जले, नैमित्तिकं पृथ्वीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।

पदकृत्यम्

आद्यस्यन्देति। दण्डादिवारणाय असमवायीति। रसादिवारणाय स्यन्देति।

प्रथम स्यन्दन (बहना) के असमवायिकारण गुणको द्रवत्व कहते हैं। वह पृथिवी, जल और तेज में रहता है। द्रवत्व भी दो प्रकार का है—सांसिद्धिक और नैमित्तिक (स्वभावसिद्ध द्रवत्व सांसिद्धिक-द्रवत्व है और अग्नि आदि तेजों के द्वारा होने वाला द्रवत्व नैमित्तिक द्रवत्व है) सांसिद्धिक (स्वाभाविक) द्रवत्व जल में रहता है और नैमित्तिक द्रवत्व पृथिवी तथा तेज दोनों में है। घृत, लाह, मोम, सुवर्ण आदि पदार्थों में नैमित्तिक द्रवत्व है, क्योंकि वह अग्नि आदि तैजस पदार्थ के संयोग से उत्पन्न होता है।

स्नेहस्य किं लक्षणम्, कुत्र च सः ?

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।

पदकृत्यम्

चूर्णादीति। चूर्णम्=पिष्टम् तदेव आदि यस्य मृत्तिकादेः स चूर्णादि तस्य पिण्डीभावः=संयोगविशेषः, तस्य हेतुः=निमित्तकारणं स्नेह इत्यर्थः। कालादौ अतिव्याप्तिवारणाय गुणपदम्। रूपादावतिव्याप्तिवारणाय पिण्डीभावेति। चूर्णपदं स्पष्टार्थम्।

गेहूँ आदि के आटा को जिससे मिलाकर पिण्ड बनाया जाय, उस गुण का

नाम 'स्नेह' (चिकनाहट) है। स्नेह केवल जल में ही रहता है।

शब्दस्य किं लक्षणम्, कतिविधश्च सः ?

श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

पदकृत्यम्

श्रोत्रेति। शब्दत्वेऽतिव्याप्तिवारणाय गुण इति। रूपादिवारणाय श्रोत्रग्राह्य इति। वस्तुतस्तु श्रोत्रोत्पन्नशब्दस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्नेऽतिव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वे तात्पर्याद् गुणपदमनुपादेयमेव।

जिस गुण का श्रोत्रेन्द्रिय (कान) से प्रत्यक्ष (ज्ञान) होता हो उसे 'शब्द' कहते हैं। शब्द केवल आकाश में ही रहता है। वह दो तरह का है—ध्वन्यात्मक और वर्णात्मक। भेरी (नगाड़ा) आदि बाजा बजाने से जो शब्द उत्पन्न होता है, वह ध्वन्यात्मक शब्द कहा जाता है। और कण्ठ से संस्कृत भाषा आदि रूप जो शब्द निकलता है, वह वर्णात्मक शब्द कहलाता है।

बुद्धेः किं लक्षणं, कतिविधा च सा ?

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा-स्मृतिरनुभवश्च।

पदकृत्यम्

सर्वेति। बुद्धिलक्षणमाह सर्वेति। सर्वे ये व्यवहाराः आहारविहारादयः तेषां हेतुर्बुद्धिः इत्यर्थः। दण्डादिवारणाय सर्वव्यवहारेति। कालादिवारणाय असाधारणेति देयम्।

सभी तरह के व्यवहार में जो गुण कारण हो उसे 'बुद्धि' (ज्ञान) कहते हैं। बुद्धि दो प्रकार की है। एक स्मरणात्मक, दूसरी अनुभवात्मक।

स्मृतेः किं लक्षणं ?

संस्कारमात्रजन्यं ज्ञानं स्मृतिः।

पदकृत्यम्

संस्कारमात्रेति। संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति। अनुभवेऽतिव्याप्तिवारणाय संस्कारजन्यमिति। तथापि प्रत्यभिज्ञायामतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयम्। क्वचित्तथैव पाठः। न चैवं सत्यसम्भवः, तस्य संस्कारजन्यत्वे सति इन्द्रियार्थसन्निकर्षाजन्यार्थकत्वात्।

जो ज्ञान केवल संस्कार से ही उत्पन्न होता हो, उसे 'स्मृति' कहते हैं

अनुभवस्य किं लक्षणम्, कतिविधश्च सः ?

तच्छिन्नं ज्ञानमनुभवः। स द्विविधः—यथार्थोऽयथार्थश्च।

पदकृत्यम्

तदिति। स्मृतित्वावच्छिन्नमित्यर्थः। तेन यत्किञ्चित्स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेऽपि न क्षतिः। घटादावतिव्याप्तिवारणाय ज्ञानमिति। स्मृतिवारणाय तद्भिन्नमिति।

स्मृति से भिन्न ज्ञान को 'अनुभव' कहते हैं। वह दो तरह का है—एक यथार्थ अनुभव (सच्चा ज्ञान) और दूसरा अयथार्थ अनुभव (मिथ्याज्ञान)।

यथार्थानुभवस्य किं लक्षणं, किञ्चोदाहरणम् ?

तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा रजते 'इदं रजतम्' इति ज्ञानम्। सैव प्रमेत्युच्यते।

पदकृत्यम्

तद्वतीति। तद्वति तत्प्रकारो यस्य स तथेत्यर्थः। तद्वद्विशेष्यकतत्प्रकारक इति यावत्। स्मृतिवारणाय अनुभव इति। अयथार्थानुभववारणाय तद्वतीति। निर्विकल्पकेऽतिव्याप्तिवारणाय तत्प्रकारक इति।

जो वस्तु जैसी हो उसको वैसो ही समझना, 'यथार्थ अनुभव' (प्रमा) कहलाता है। जैसे—रजत को रजत ही समझना न कि सोना।

अयथार्थानुभवस्य किं लक्षणं किञ्चोदाहरणम् ?

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः । यथा—शुक्तौ 'इदं रजतम्' इति ज्ञानम् । सैवाऽप्रमेत्युच्यते ।

पदकृत्यम्

तदभावेति । तदभाववद्विशेष्यकतत्प्रकारकः अनुभवः अयथार्थानुभव इत्यर्थः । यथा शुक्तौ 'इदं रजतम्' इति ज्ञानम् । स्मृतिवारणाय अनुभव इति । यथार्थानुभवेऽतिव्याप्तिनिरसनाय तदभाववतीति । निर्विकल्पकवारणाय तत्प्रकारक इति ।

'अयथार्थं' (अप्रमा) उसे कहते हैं जो द्रव्य वास्तव में वैसा न हो, किन्तु तत्समानाकार होने से उसे वैसा ही समझ लिया जाय । जैसे—समानाकार होने से सीप को चाँदी और रस्सी को सर्प समझना ।

यथार्थानुभवभेदाः के ?

यथार्थानुभवश्चतुर्विधः—प्रत्यक्षाऽनुमित्युपमितिशाब्दभेदात् ।

पदकत्यम

यथार्थेति । यथार्थानुभवः प्रत्यक्षमेव इति चार्वाकाः । अनुमितिरपि इति काणाद-बौद्धाः । उपमितिरपि इति नैयायिकैकदेशिनः । शब्दोऽपि इति नैयायिकाः । अर्थापत्तिरपि इति प्राभाकराः । अनुपलब्धिकोऽपि इति भाट्टवेदान्तिनौ। सांभविक-ऐतिह्यकौ अपि इति पौराणिकाः। चेष्टिकोऽपि इति तान्त्रिकाः । एतेषां मतेऽस्वरसं सम्भाव्य तस्य चातुर्विध्यं दर्शितम् ।

'यथार्थानुभव ४ प्रकार का होता है—प्रत्यक्ष, अनुमिति, उपमिति और शाब्द । (प्रत्यक्षस्वरूप यथार्थानुभव जैसे—'अयं घटः' । अनुमितिस्वरूप यथार्थानुभव जैसे—'पर्वतो वह्निमान्' । उपमितिस्वरूप यथार्थानुभव जैसे—गोसदृशो गवयः' । शाब्दबोधस्वरूप यथार्थानुभव जैसे 'अहं गच्छामि' ।)

तत्करणं कतिविधम् ?

तत्करणमपि चतुर्विधम्—प्रत्यक्षानुमानोपमानशब्दभेदात् ।

पदकृत्यम्

तदिति । यथार्थानुभवात्मकप्रमायाः करणम् इत्यर्थः ।

यथार्थ अनुभव करण (असाधारण कारण) भी ४ प्रकार के होते हैं। प्रत्यक्ष, अनुमान, उपमान और शब्द ।

करणस्य किं लक्षणम् ?

असाधारणं कारणं करणम् ।

पदकृत्यम्

कालादिवारणाय असाधारणमिति । व्यापारेऽतिव्याप्तिवारणाय व्यापारवदित्यपि देयम् । व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः । ईश्वरेच्छादिवारणाय तज्जन्यत्वे सतीति । कुलाल-जन्यत्वे सति कुलालजन्यघटजनकत्वं कुलालजन्यत्वं कुलालपुत्रस्यापि अस्ति, अतः तत्रातिव्याप्तिवारणाय प्रथमं सत्यन्तम् । दण्डरूपादि-वारणाय तज्जन्यजनक इति ।

जो कार्य के प्रति असाधारण (विशेष) कारण हो उसे करण कहते हैं । (सभी कार्यों की उत्पत्ति के कारण ईश्वर को साधारण कारण कहते हैं ।)

कारणस्य किं लक्षणम् ?

कार्यनियतपूर्ववृत्ति कारणम् ।

पदकृत्यम्

कार्येति । कार्यात् नियता=अवश्यम्भाविनी, पूर्ववृत्तिः=पूर्वक्षणवृत्ति-र्यस्य तत् तथेत्यर्थः । अनियतरासभादिवारणाय नियतेति । कार्यवारणाय पूर्वेति । दण्डत्ववारणाय अनन्यथासिद्धत्व—विशेषणस्य आवश्यकत्वेन तत एव रासभादिवारणसम्भवे नियतपदम् अनर्थकमेव । एवं च अनन्य-थासिद्धकार्यपूर्ववृत्ति कारणम् इति फलितम् । अनन्यथासिद्धत्वम् अन्यथा-सिद्धिशून्यत्वम् । अन्यथासिद्धिश्च अवश्यक्लृप्तनियतपूर्ववर्तिभिः दण्डा-दिभिः एव घटरूपकार्यसम्भवे तत्सहभूतत्वं दण्डत्वादौ,तत् अन्यथासिद्धम्।

जो घट पट आदि कार्यों की उत्पत्ति के पहले अवश्य रहे उसे 'कारण' कहते हैं। जैसे–घट के प्रति दण्ड, चक्र, चीवर, कुलाल आदि और पट के प्रति तुरी वेमा कुविन्द आदि कारण हैं।

कार्यस्य किं लक्षणम् ?

कार्यं प्रागभावप्रतियोगि ।

पदकृत्यम्

कार्यमिति । कालादिवारणाय प्रागिति । असम्भववारणाय प्रतियोगीति ।

प्रागभाव के प्रतियोगी को (अर्थात् जिसके उत्पन्न होने की सम्भावना हो उसे) कार्य कहते हैं। जैसे—घट पट आदि।

कारणं कतिविधम् ?

कारणं त्रिविधं—समवाय्यसमवायिनिमित्तभेदात् ।

कारण ३ प्रकार के होते हैं। समवायिकारण, असमवायिकारण, और निमित्तकारण ।

समवायिकारणस्य किं लक्षणं किञ्चोदाहरणम् ?

यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम् । यथा-तन्तवः पटस्य पटश्च स्वगतरूपादेः ।

पदकृत्यम्

यदिति । यस्मिन् समवायसम्बन्धेन वर्तमानं तदित्यर्थः । चक्रादिवारणाय समवेतमिति ।

जिस द्रव्य में समवाय सम्बन्ध से कार्य उत्पन्न हो उसे 'समवायिकारण' कहते हैं। जैसे–वस्त्र का समवायिकारण तन्तु है। और वस्त्र अपने श्वेत आदि रूप का समवायिकारण है। क्योंकि तन्तु में वस्त्र एवं वस्त्र में रूप समवाय सम्बन्ध से उत्पन्न होता है।

असमवायिकारणस्य किं लक्षणं किञ्चोदाहरणम् ?

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम् । यथा-तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य ।

पदकृत्यम्

कार्येति । कार्येण कारणेन वा सह एकस्मिन् अर्थे समवेतत्वे सति आत्मविशेषगुणभिन्नत्वे सति यत् कारणं तत् असमवायिकारणम् । तन्तुसंयोगादावव्याप्तिवारणाय कार्येणेति । तन्तुरूपादावव्याप्तिवारणाय कारणेनेति । आत्मविशेषगुणेऽतिव्याप्तिवारणाय आत्मविशेषगुणभिन्नत्वे सतीति । विशेषवारणाय कारणमिति ।

जो कारण कार्य या कारण के साथ एक ही अधिकरण (स्थान) में समवाय सम्बन्ध से विद्यमान हो, उसे 'असमवायिकारण' कहते हैं । जैसे–(कार्य के साथ) तन्तुओं का संयोग वस्त्र के प्रति असमवायिकारण है और–(कारण के साथ) तन्तु का रूप वस्त्र के रूप के प्रति असमवायिकारण है ।

निमित्तकारणस्य किं लक्षणम् ? किञ्चोदाहरणम् ?

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा-तुरीवेमादिकं पटस्य-

पदकृत्यम्

तदुभयेति । समवाय्यसमवायिकारणवारणाय तदुभयभिन्नमिति । शेषादावतिव्याप्तिवारणाय कारणमिति ।

जो समवायिकारण और असमवायिकारण इन दोनों से भिन्न हो उसे 'निमित्तकारण' कहते हैं । जैसे—तुरी वेमा (जुलाहे का ताना आदि) यन्त्र वस्त्रका निमित्त कारण है ।

करणस्य निष्कृष्टलक्षणं किम् ?

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

पदकृत्यम्

तदेतदिति । यस्मात् कारणात् करणत्वघटकं कारणमुपदर्शितं तस्मात् एतत् त्रिविधसाधकमध्ये यत्साधकतमं तदेव करणमिति भावः ।

उपर्युक्त तीनों कारणों में जो असाधारणकारण हो वही 'करण' कहलाता है।

प्रत्यक्षप्रमाणस्य किं लक्षणम् ?

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ।

पदकृत्यम्

तत्रेति । प्रमाणचतुष्टयमध्ये । दण्डादिवारणाय ज्ञानेति । अनुमानादिवारणाय प्रत्यक्षेति ।

प्रत्यक्ष ज्ञान का असाधारण कारण (चक्षुरादि इन्द्रियाँ) 'प्रत्यक्ष प्रमाण' हैं

प्रत्यक्षप्रमाणस्य किं लक्षणम् ? कतिविधं च तत् ?

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्) तद्द्विविधं—निर्विकल्पकं सविकल्पकं चेति ।

पदकृत्यम्

इन्द्रियार्थसन्निकर्षजन्यं । इन्द्रियम्=चक्षुरादिकम्, अर्थः =घटादिः, तयोः सन्निकर्षः=संयोगादिः, तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः । सन्निकर्षध्वंसवारणाय ज्ञानमिति । अनुमित्यादिवारणाय इन्द्रियार्थसन्निकर्षेति । ननु सोपनेत्रचक्षुषा कथं पदार्थग्रहणम् ? चक्षुष उपनेत्रादिरुद्धत्वेन पदार्थेन सह सन्निकर्षाभावात्, कथं वा स्वच्छजाह्नवीसलिलावृतमत्स्यादेश्चक्षुषो ग्रहणम् ? इति चेत् न स्वच्छद्रव्यस्य तेजोनिरोधकत्वाभावेन तदन्तः चक्षुःप्रवेशसम्भवात् । न चेश्वरप्रत्यक्षेऽव्याप्तिरिति वाच्यम्, अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात् ।

प्रत्यक्ष ज्ञान वही कहलाता है, जो चक्षुरादि इन्द्रियों और घट-पटादि विषयों के सन्निकर्ष (सम्बन्ध) से होता है । (ईश्वरीय प्रत्यक्ष प्रमाण का लक्षण यह हैं कि जिस ज्ञान में किसी दूसरे ज्ञान की अपेक्षा न हो) यह प्रत्यक्ष दो तरह का है—एक निर्विकल्पक और दूसरा सविकल्पक ।

निर्विकल्पकस्य लक्षणं किम् ?

तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।

पदकृत्यम्

तत्रेति । सविकल्पकेऽतिव्याप्तिवारणाय निष्प्रारकमिति । प्रकारवारणाय ज्ञानमिति ।

जिस ज्ञान में विशेष्य विशेषण और सम्बन्ध का निर्णय न हो उसे 'निर्विकल्पक' ज्ञान कहते हैं ।

सविकल्पकस्य लक्षणं किम् ?

सप्रकारकं ज्ञानं सविकल्पकम् । यथा–डित्थोऽयम्, ब्राह्मणोऽयम्, श्यामोऽयमिति ।

पदकृत्यम्

सप्रकारकमिति । घटादिवारणाय ज्ञानमिति । निर्विकल्पकवारणाय सप्रकारकमिति ।

जिस ज्ञान में विशेष्य-विशेषण तथा दोनों का सम्बन्ध स्पष्ट रूप से प्रतीत हो उसे 'सविकल्पक' ज्ञान कहते हैं । जैसे–'यह डित्थ (लकड़ी या हाथी) है' 'यह ब्राह्मण है' 'यह श्याम है ।'

सन्निकर्षः कः, कतिविधश्च सः ?

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।

पदकृत्यम्

प्रत्यक्षेति । तच्च प्रत्यक्षं षड्विधं घ्राणज-रासन-चाक्षुष-श्रौत्र-त्वाच-मानस-भेदात् । ननु प्रत्यक्षकारणीभूतेन्द्रियनिष्ठप्रत्यक्षसामानाधिकरण्य-घटकः सन्निकर्षः कः ? इत्यपेक्षायां तं विभज्य दर्शयति प्रत्यक्षेति । लौकिकप्रत्यक्षेत्यर्थः ।

प्रत्यक्षज्ञान का कारण घटादि विषय और चक्षुरादि इन्द्रियों का सम्बन्ध ६ प्रकार का है—१ संयोग, २ संयुक्तसमवाय, ३ संयुक्तसमवेतसमवाय, ४ समवाय, ५ समवेतसमवाय और ६ विशेषणविशेष्यभाव।

घटादिप्रत्यक्षे कः सन्निकर्षः ?

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।

पदकृत्यम्

संयोगमुदाहरति चक्षुषेति। तथा च द्रव्यचाक्षुषत्वाचमानसेषु संयोग एव सन्निकर्ष इति भावः।

नेत्र से घटपटादि विषयों का प्रत्यक्षज्ञान करने में 'संयोग' सन्निकर्ष होता है।

घटादिरूपप्रत्यक्षे कः सन्निकर्षः ?

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात्।

पदकृत्यम्

घटरूपेति। चक्षुषा इत्यनुषज्यते। तथा च द्रव्यसमवेतचाक्षुष-त्वाच, मानस-रासन-घ्राणजेषु संयुक्तसमवाय एव संनिकर्ष इति भावः।

नेत्र से घट के लाल, पीले आदि रूप का प्रत्यक्ष ज्ञान करने में 'संयुक्त-समवाय, सन्निकर्ष होता है; क्योंकि नेत्र से संयुक्त घट में समवाय सम्बन्ध से रूप रहता है।

रूपत्वसामान्यप्रत्यक्षे कः सन्निकर्षः ?

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्।

पदकृत्यम्

रुपत्वेति। रूपत्वात्मकं यत् सामान्यं तत्प्रत्यक्ष इत्यर्थः। अत्रापि चक्षुषा इत्यनुषज्यते। तथा च द्रव्यसमवेतचाक्षुष-रासन-घ्राणज-

स्पार्शन-मानसेषु संयुक्तसमवेतसमवाय एव सन्निकर्ष इति भावः। अथ द्रव्यतत्समवेतप्रत्यक्षेऽपि संयुक्तसमवेतसमवाय एव सन्निकर्षोऽस्तु चेन्नैतत्, ईश्वरात्मादेरनध्यक्षत्वप्रसंगात्

नेत्र से घट आदि के रूप में रहने वाली रूपत्वजाति के प्रत्यक्ष में 'संयुक्त समवेतसमवाय' सन्निकर्ष है, क्योंकि नेत्र से संयुक्त घट में समवाय सम्बन्ध से रूप रहता है और रूप में समवाय सम्बन्ध से रूपत्व रहता है।

शब्दप्रत्यक्षे कः सन्निकर्षः ?

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात्, शब्दस्याकाशगुणत्वाद्, गुणगुणिनोश्च समवायात्।

पदकृत्यम्

समवायसन्निकर्षमुदाहरति श्रोत्रेणेति। जननीये इति शेषः। ननु श्रोत्रशब्दयोः कथं समवाय इत्यपेक्षमाणं प्रति तमुपपाद्य दर्शयति कर्णेति। अथ समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति चेत् ? शब्द-श्रोत्रमन संयोगो वेतिगृहाण।

श्रोत्र (कान) से शब्द के प्रत्यक्ष करने मे 'समवाय' सन्निकर्ष होता है। क्योंकि कान के विवर (छिद्र) में वर्तमान श्रोत्रेन्द्रिय है और शब्द आकाश का गुण है, गुण और गुणी का समवाय सम्बन्ध होता है।

शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।

पदकृत्यम्

शब्दत्वेति। श्रोत्रेण जननीये इत्यनुकर्षशेषौ।

श्रोत्रेन्द्रिय से शब्दत्व जाति के प्रत्यक्षज्ञान करने में 'समवेतसमवाय'

सन्निकर्ष माना जाता है, क्योंकि श्रोत्र में शब्द और उसमें शब्दत्व समवाय-सम्बन्ध से रहता है।

अभावप्रत्यक्षे कः सन्निकर्षः ?

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, 'घटाभाववद् भूतलम्' इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।

पदकृत्यम्

अभावेति। विशेषणभावो विशेष्यभावश्चेति बोध्यम्। इन्द्रियसम्बद्धविशेषणत्वम् इन्द्रियसम्बद्धविशेष्यत्वमिति यावत्। विशेषणभावसन्निकर्षमुपपाद्य दर्शयति घटाभाववदिति। 'इह भूतले घटो नास्ति' इत्यादौ विशेष्यतासन्निकर्षोऽवधेयः सप्तम्यन्तस्य विशेषणत्वात्।

अभावों के प्रत्यक्ष में 'विशेषणविशेष्यभाव' सन्निकर्ष होता है, क्योंकि 'घटाभाववद्भूतलम्' इत्यादि स्थलों में नेत्र से संयुक्त भूतल में घटाभाव आदि विशेषण और भूतल विशेष्य है।

प्रत्यक्षप्रमाणस्य निष्कृष्टं लक्षणं किम् ?

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्, तत्करणमिन्द्रियम्, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

पदकृत्यम्

प्रत्यक्षप्रमाणमुपसंहरति एवमिति। उपदर्शितक्रमेणेत्यर्थः। ननु सिद्धान्ते प्रत्यक्षज्ञानकरणम् इन्द्रियार्थसन्निकर्षः किं स्यादिति चेन्नेत्याह तत्करणमिति। प्रत्यक्षप्रमाणं निगमयति तस्मादिति। प्रत्यक्षप्रमाणकत्वादित्यर्थः। सिद्धमिति न्यायसिद्धान्ते सिद्धमित्यर्थः।

इस तरह संयोगादि ६ सन्निकर्षों से उत्पन्न ज्ञान 'प्रत्यक्ष' कहलाता है। इस ज्ञान का करण चक्षुरादि इन्द्रियाँ हैं, अतः इन्द्रियाँ ही प्रत्यक्ष प्रमाण हैं।

इति प्रत्यक्षपरिच्छेदः।

अनुमानस्य किं लक्षणम् ?

अनुमितिकरणमनुमानम् ।

पदकृत्यम्

प्रत्यक्षानुमानयोः कार्यकारणभावसङ्गतिमभिप्रेत्य प्रत्यक्षानन्तरम् अनुमानं निरूपयति अनुमितीति । अनुमितेः करणम् अनुमानमित्यर्थः । तच्च लिङ्गपरामर्श एवेति निवेदयिष्यते । कुठारादौ अतिव्याप्तिवारणाय अनुमितीति । प्रत्यक्षादौ अतिव्याप्तिवारणाय अन्विति ।

अनुमितिज्ञान के प्रधान कारण को 'अनुमान' कहते हैं ।

अनुमितिः का ?

परामर्शजन्यं ज्ञानमनुमितिः ।

पदकृत्यम्

ननु अनुमितेरेव दुर्निरूपत्वात् तद्घटितानुमानम् अपि दुर्निरूपम् इत्यत आह परामर्शेति । प्रत्यक्षादौ अतिव्याप्तिवारणाय परामर्शजन्यमिति । परामर्शध्वंसवारणाय ज्ञानमिति । परामर्शप्रत्यक्षवारणाय हेत्वविषयकम् इत्यपि बोध्यम् ।

परामर्शरूप ज्ञानसे उत्पन्न ज्ञान को 'अनुमिति' कहते हैं ।

परामर्शस्य किं लक्षणम् ?

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा–'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः ।

पदकृत्यम्

व्याप्तिविशिष्टेति । विषयितासम्बन्धेन व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इत्यर्थः । घटादिज्ञानवारणाय पक्षधर्मतेति । धूमवान् पर्वत इत्यादिज्ञानवारणाय व्याप्तिविशिष्टेति । तदिति । परामर्शजन्यम् इत्यर्थः ।

व्याप्ति (सम्बन्ध) से विशिष्ट धूम का पर्वत में जो विशिष्टज्ञान होता है, उसे परामर्श कहते हैं। 'परामर्श' का स्वरूप यह है—'वह्निव्याप्यधूमवानयं पर्वतः।' इस परामर्श से उत्पन्न 'पर्वत अग्निमान् है' यह ज्ञान अनुमिति कहलाता है।

व्याप्तिः का ?

'यत्र यत्र धूमस्तत्र तत्र वह्निः' इति साहचर्यनियमो व्याप्तिः।

पदकृत्यम्

यत्र यत्रेति। यत्र यत्र धूमस्तत्र तत्राग्निरिति व्याप्तेरभिनयः साहचर्यनियम इति लक्षणम्। सहचरतीति सहचरस्तस्य भावः साहचर्यम्, सामानाधिकरण्यम् इति यावत्, तस्य निगमः व्याप्तिः इत्यर्थः। सच अव्यभिचरितत्वम्, तच्च व्यभिचाराभावः। व्यभिचारश्च साध्याभाववद्वृत्तित्वम्। तथा च साध्याभाववदवृत्तित्वं व्याप्तिरिति पर्यवसन्नम्। महानसं वह्निमत् धूमात् इत्यादौ, साध्यो वह्निः तदभाववान् जलह्रदादिः तद्वृत्तित्वं नौकादौ, अवृत्तित्वम् प्रकृते हेतुभूते धूमे इति कृत्वा लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्यो धूमः तदभाववत् अयोगोलकः तद्वृत्तित्वमेव वह्न्यादौ इति नातिव्याप्तिः।

'जिस स्थान में धूम है उस स्थान में निश्चय ही अग्नि है' इस 'साहचर्य' (सामानाधिकरण्य) नियम को व्याप्ति कहते हैं।

पक्षधर्मतायाः किं लक्षणम् ?

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

पदकृत्यम्

ननु ज्ञातेयं व्याप्तिः पक्षधर्मताज्ञानमित्यत्र का नाम पक्षधर्मता ? इत्यपेक्षमाणं प्रति तत्स्वरूपं निरूपयति व्याप्यस्येति। व्याप्यो नाम व्याप्त्याश्रयः, सच धूमादिरेव, तस्य पर्वतादिवृत्तित्वं पक्षधर्मतेत्यर्थः।

व्याप्य (धूम आदिहेतु) का पर्वत आदि (पक्ष) में रहने को 'पक्षधर्मता' कहते हैं।

अनुमानं कतिविधम् ?

अनुमानं द्विविधं—स्वार्थं परार्थं च ।

पदकृत्यम्

अथ कथम् अनुमानम् अनुमितिकरणम्, कथं वा तस्मात् अनुमितेर्जनिः ? इति जिज्ञासमानं प्रति लाघवादनुमानविभागमुखेनैव बुबोधयिषुः अनुमानं विभजते अनुमानं द्विविधमिति । तद्द्वैविध्यं दर्शयति स्वार्थमिति ।

अनुमान २ तरह का है—एक 'स्वार्थ अनुमान', और दूसरा 'परार्थ अनुमान' ।

किं नाम स्वार्थानुमानम् ?

तत्र स्वार्थं स्वानुमितिहेतुः । तथाहि-स्वयमेव भूयोदर्शनेन 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति 'यत्र-यत्र धूमस्तत्र तत्राग्निः' इति । तदनन्तरं 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते, अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात्पर्वतो वह्निमान्, इति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।

पदकृत्यम्

स्वार्थमिति । स्वस्य अर्थः प्रयोजनं यस्मात् तत् स्वार्थमिति समासः । स्वप्रयोजनं च स्वस्यानुमेयप्रतिपत्तिः । एवं परार्थमित्यस्यापि । अयमिति व्याप्तिबलेन लीनम् अर्थं गमयति लिङ्गम्, तच्च धूमादि । तस्य परामर्शः=ज्ञानविशेषः तस्मादिति । लिङ्गपरामर्शात इत्यर्थः । स्वार्थानुमानम उपसंहरति तदेतदिति । यस्मात् इदं स्वप्रतिपत्तिहेतुः तस्मात् एतत् स्वार्थानुमानम् ।

अनुमान करने वाले को जिस अनुमान से स्वयं अनुमिति हो—उसे 'स्वार्थ अनुमान' कहते हैं। जैसे कोई मनुष्य बार-बार महानस (रसोई घर, गोष्ठ) आदि में धूम और अग्नि को एक साथ रहते देखकर 'जहाँ धूम रहता है, वहाँ अग्नि निश्चय रहता है' इस तरह से धूम और अग्नि की व्याप्ति का निश्चय कर लिया है। बाद कभी पर्वत पर जाकर 'इस पर्वत में अग्नि है या नहीं' इस तरह का सन्देह करते हुए उस पर्वत में धूम को देखकर 'जहाँ धूम रहता है, वहाँ अग्नि निश्चय ही रहती है' इस व्याप्ति का स्मरण करता है। इसके बाद उसे वह्निव्याप्य धूमवाला यह पर्वत है ऐसा ज्ञान होता है। वही ज्ञान 'लिङ्गपरामर्श' है। इस ज्ञान से मनुष्य को 'पर्वत अग्निवाला है' यह ज्ञान होता है। यही ज्ञान स्वार्थानुमान कहलाता है; क्योंकि जिसे व्याप्तिज्ञान है उसी को अनुमिति होती है।

परार्थानुमानस्य किं स्वरूपम् ?

यतु स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुज्यते,तत्परार्थानुमानम्। यथा-पर्वतो वह्निमान्, धूमवत्त्वात्,यो यो धूमवान् स स वह्निमान् यथा महानसम्,तथा चायम्, तस्मात्तथः इति। अनेन प्रतिपादितालिङ्गात्परोऽप्यग्निं प्रतिपद्यते।

पदकृत्यम्

क्रमप्राप्तं परार्थानुमानमाह यत्तु इति। यत् पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम् इति सम्बन्धः। पञ्चावयवेति। अथावयवत्वं नाम द्रव्यसमवायिकारणत्वम्, प्रतिज्ञादिषु तदसम्भवात् कथमेतेऽवयवाः स्युः, इति चेदनुमानवाक्यैकदेशत्वात्त अवयवा इत्युपचर्यते इति गृहाण। ननु एवमपि पचावयववाक्यस्य अनुमानत्वमेव न विचारसहम्, तस्य लिङ्गपरामर्शत्वाभावात् इति चेत्? मैवम्, लिङ्गपरामर्शप्रयोजकलिङ्गप्रतिपादकत्वेन अनुमानम्, इत्युपचारमात्रत्वात् तदुदाहरति यथेति तथा चायमिति। अयं च पर्वतः = वह्निव्याप्यधूमवान् इत्यर्थः।

तस्मात्तथेति । वह्निव्याप्यधूमवत्त्वाद् वह्निमानित्यर्थः. अनेनेति । अनेन पंचावयववाक्येन इत्यर्थः ।

स्वयं धूम हेतु से अग्नि का अनुमान करके दूसरे व्यक्ति को ज्ञान कराने के लिए पञ्चावयव वाक्य जो प्रयोग किया जाता है, उसे परार्थानुमान' कहते हैं। पंचावयव वाक्य ये हैं–१ 'पर्वत में अग्नि है', २ 'धूम के रहने से'। ३ जहाँ-जहाँ धूम रहता है वहाँ-वहाँ अग्नि निश्चय रहती है, जैसे रसोई के घर में', ४ यह 'वैसा ही है'। ५ 'अतः इस पर्वत में भी अग्नि निश्चित है' इस प्रकार कहने पर दूसरा व्यक्ति भी पर्वत पर अग्नि का अनुमान कर लेता है।

के पञ्चावयवाः ?

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । (१) पर्वतो वह्निमानिति प्रतिज्ञा (२) धूमवत्त्वादिति हेतुः (३)–यो यो धूमवान् स स वह्निमानित्युदाहरणम् (४) तथा चायमित्युपनयः (५)–तस्मात्तथेति निगमनम् ।

पदकृत्यम्

ननु पञ्चावयववाक्यम् इत्यत्र के ते पञ्चावयवाः ? अतः तान् दर्शयति प्रतिज्ञेति । प्रतिज्ञाद्यन्यतमत्वम् अवयवत्वम् । साध्यविशिष्टपक्षबोधकवचनम प्रतिज्ञा । पञ्चम्यन्तं तृतीयान्तं वा लिंगवचनं हेतुः । व्याप्तिप्रतिपादकदृष्टान्तवचनम् उदाहरणम् । उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधमताप्रतिपादकवचनम् उपनयः । पक्षे साध्यस्य अबाधितत्वप्रतिपादकवचनं निगमनम् । इदमेव लक्षणं हृदि निधाय प्रतिज्ञादीन् विशिष्य दर्शयति पर्वतो वह्निमानिति ।

परार्थानुमान बोधक वाक्य के पाँच अवयव होते हैं–प्रतिज्ञा, हेतु, उदाहरण, उपनय और निगमन । प्रतिज्ञा जैसे–'पर्वतो वह्निमान्' । हेतु जैसे–'धूमत्वात्' । उदाहरण जैसे–'यो यो धूमवान्, स स वह्निमान्; यथा महानसम्' उपयन जैसे–'तथा चायम्' । निगमन जैसे—'तस्मात्तथा' ।

स्वार्थानुमितिपरार्थानुमित्योः किं करणम् ?

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम् । तस्मात् लिङ्गपरामर्शोऽनुमानम् ।

पदकृत्यम्

स्वार्थेति । ज्ञायमानं लिङ्गम् अनुमितिकरणम् इति वृद्धोक्तं न युक्तम् इयं यज्ञशाला वह्निमती,अतीतधूमात् इत्यादौ लिङ्गाभावेऽपि अनुमिति-दर्शनात् इत्यभिप्रायवान् लिङ्गपरामर्श एव करणम् इति व्याचष्टे लिङ्गपरामर्शेति । अनुमानमुपसंहरति तस्मादिति । अनुमितिकरणत्वा-दित्यर्थः । अयमेव तृतीयज्ञानमित्युच्यते । तथाहि महानसादौ धूमाग्न्यो-र्व्याप्तौ गृह्यमाणायां यद् धूमज्ञानं तत् आदिमम् । पक्षे यद् धूमज्ञानं तद् द्वितीयम् । अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत् तृतीयम् । इदमेव लिङ्गपरामर्श इत्युच्यते । अनुमानमिति । व्यापारवत् कारणं करणमिति-मते व्याप्तिज्ञानमेवानुमानम्, लिङ्गपरामर्शो व्यापार इत्यवधेयम् ।

स्वार्थ एवं परार्थानुमिति का करण लिङ्गपरामर्श है । अतः लिङ्गपरामर्श को ही अनुमान प्रमाण कहते हैं ।

लिङ्गं कतिविधम् ?

लिङ्गं त्रिविधम्—अन्वयव्यतिरेकि, केवलान्वयि, केवल-व्यतिरेकि चेति ।

पदकृत्यम्

लिङ्गमिति । लिङ्गभेदमाह-त्रिविधमिति । तत्सत्त्वे तत्सत्ता अन्वयः (हेतुसत्त्वे साध्यसत्ता अन्वयः) हेत्वभावे (तदभावे) साध्याभावः (तदभावः) व्यतिरेकः ।

'लिङ्ग' (हेतु) ३ प्रकार का होता है—(१) अन्वयव्यतिरेकि, (२) केवलान्वयि और (३) केवलव्यतिरेकि ।

अन्वयव्यतिरेकिण किं लक्षणम् ?

अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि । यथा–वह्नौ साध्ये धूमवत्त्वम् । 'यत्र धूमस्तत्राग्निर्यथा महानसम्' इत्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः ।

पदकृत्यम्

अन्वयव्यतिरेकिणो लक्षणमाह अन्वयेति । तृतीयायाः प्रयोज्यत्वमर्थः । साध्यसाधनयोः साहचर्यमन्वयः, तदभावयोः साहचर्यं व्यतिरेकः । तथा चान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः । केवलव्यतिरेकिण्यतिव्याप्तिवारणाय अन्वयेनेति । केवलान्वयिनि व्यभिचारवारणाय व्यतिरेकेणेति । तथा च अन्वयव्याप्तिरुपदर्शितैव । व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वम् इत्यर्थः । तदुक्तम्–

व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।
तयोरभावयोस्तस्माद् विपरीतः प्रतीयते ।।
अन्वयः साधनं व्याप्यं साध्यं व्यापकमिष्यते ।
साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः ।।

अन्वयव्यतिरेकि लिङ्ग (हेतु) वह है जिसमें अन्वय और व्यतिरेक ये दोनों व्याप्ति हों जैसे—वह्नि के अनुमान में धूम रूप हेतु अन्वयव्यतिरेकि है । 'जहाँ धूम है वहाँ अग्नि, जैसे रसोई घर में' यह अन्वयव्याप्ति है 'जहाँ अग्नि नहीं है; वहाँ धूम भी नहीं है, जैसे जलाशय में' यह 'व्यतिरेकव्याप्ति' है ।

केवलान्वयिनः किं लक्षणम् ?

अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा–घटोऽभिधेयः प्रमेयत्वात् पटवत्' । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ।

पदकृत्यम्

अन्वयेति । अन्वयेनेव व्याप्तिर्यस्मिन् तत् तथा । प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति अत्रेति । अभिधेयत्वसाधकानुमान इत्यथः । कुतस्तन्निषेधोऽतस्तत्र हेतुमाह सर्वस्येति । पदार्थमात्रस्येत्यर्थः । तथा च सकलपदाभिधेयत्वस्य ईश्वरप्रमाविषयत्वस्य च अत्यन्ताभावाप्रतियोगिकत्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न सम्भवत्येवेति भावः ।

जिस लिङ्ग (हेतु) में केवल अन्वयव्याप्ति हो, वह केवलान्वयि है। जैसे–'घटोऽभिधेयः प्रमेयत्वात् पटवत्' यहाँ प्रमेयत्व हेतु केवलान्वयि है; क्योंकि प्रमेयत्व और अभिधेयत्व सभी पदार्थों में हैं । उनका अभाव कहीं नहीं है, अतः उनके अभाव की व्याप्ति नहीं हो सकती ।

केवलव्यतिरेकिणः किं लक्षणम् ?

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा–'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्; यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा जलम् । न चेयं तथा । तस्मान्न तथेति ।' अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात् ।

पदकृत्यम्

व्यतिरेकेति । व्यतिरेकेणैव व्याप्तिर्यस्मिंस्तत् तथा । अन्वयव्यतिरेकिणि अतिव्याप्तिवारणाय मात्रेति । नचेयं तथेति । इयम्=पृथिवी न तथा=न गन्धाभाववती इत्यर्थः । तस्मात् न तथेति । गन्धाभाववत्त्वाभावात् इतरभेदाभाववतो नेत्यर्थः । ननु अत्र किमिति न अन्वयव्याप्तिः इत्याशंक्य परिहरति अत्रेति । इतरभेदसाधकानुमान इत्यर्थः इदमुपलक्षणम्–जीवच्छरीरं सात्मकम् प्राणादिमत्त्वात् यन्नैवं तन्नैवं यथा घटः ।

प्रत्यक्षादिकं प्रमाणम् इति व्यवहर्त्तव्यम्, प्रमाकरणत्वात् यत् न एवं तत् न एवम्, यथा प्रत्यक्षाभासः । विवादास्पदम् आकाशम् इति व्यवहर्त्तव्यम् शब्दवत्त्वात् इत्यादिकमपि केवलव्यतिरेकीति द्रष्टव्यम् ।

जिस हेतु में केवल व्यतिरेकव्याप्ति हो सकती हो वह 'केवलव्यतिरेकि' हेतु है । जैसे—पृथिवी, अन्य (जलादि) पदार्थों से भिन्न है, गन्धवती होने से । जो अन्य पदार्थों से भिन्न नहीं है उसमें गन्ध भी नहीं होता जैसे—जल । पृथिवी इतर पदार्थों से भिन्न है । इस तरह भेदसाध्यक अनुमिति में अन्वय-दृष्टान्त नहीं है, क्योंकि यहाँ पृथिवीमात्र को ही पक्ष बना लिया है । अतः पृथिवीत्वहेतु केवलव्यतिरेकि हुआ ।

पक्षस्य किं लक्षणम् ?

सन्दिग्धसाध्यवान् पक्षः । यथा—धूमवत्त्वे हेतौ पर्वतः ।

पदकृत्यम्

सन्दिग्धेति । अथ पृथिवी मात्रस्य पक्षत्वात् इत्यत्र किं नाम पक्षता ? इत्यपेक्षायामाह सन्दिग्धेति । सपक्षवारणाय सन्दिग्धेति ।

जिसमें साध्य का सन्देह हो उसे 'पक्ष' कहते हैं । जैसे—धूम हेतु रखने पर ('पर्वतो वह्निमान् धूमवत्त्वात्') यहाँ पर्वत में साध्य अग्नि का सन्देह हुआ, अतः 'पर्वत' पक्ष है ।

सपक्षस्य किं लक्षणम् ?

निश्चितसाध्यवान् सपक्षः । यथा—तत्रैव महानसम् ।

पदकृत्यम्

निश्चितेति । पक्षेऽतिव्याप्तिवारणाय निश्चितेति । तत्रेवेति । धूमवत्त्वे हेतौ एवेत्यर्थः ।

जिसमें साध्यका निश्चय हो उसे 'सपक्ष' कहते हैं । जैसे पर्वतो वह्निमान् धूमवत्त्वात्' इसी स्थल में महानस सपक्ष है, क्योंकि महानस में वह्नि (साध्य) की सत्ता निश्चित है ।

विपक्षस्य किं लक्षणम् ?

निश्चितसाध्याऽभाववान् विपक्षः । यथा–तत्रैव महाह्रदः ।

पदकृत्यम्

निश्चितसाध्याभावेति । सपक्षेऽतिव्याप्तिवारणाय साध्याभावेति । पक्षेऽतिव्याप्तिवारणाय निश्चितेति । तत्रैव=धूमवत्त्वे एव ।

जिसमें साध्यके अभाव का निश्चय हो, वह 'विपक्ष' कहलाता है जैसे—('पर्वतो वह्निमान् धूमवत्त्वात्') इस अनुमान में— जलाशय विपक्ष है, क्योंकि इसमें वह्नि नहीं रहती है ।

हेत्वाभासाः कतिविधाः, के च ते ?

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।

पदकृत्यम्

हेतुं निरूप्य प्रसंगात् हेत्वाभासान् आह सव्यभिचारेति । अत्रेदं बोध्यम्, अन्वयव्यतिरेकि तु पञ्चरूपोपपन्नं स्वसाध्यं साधयितु क्षमते तानि कानि ? इति चेत् श्रूयताम्—पक्षधर्मत्वं सपक्षसत्त्वं-विपक्षाद् व्यावृत्तिः अबाधितविषयत्वं–असत्प्रतिपक्षत्वं चेति । अबाधितः, साध्यरूपी विषयो यस्य तत् तथोक्तं तस्य भावः तत्त्वम् । एवं साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्ष इति उच्यते, स नास्ति यस्य सः असत्प्रतिपक्षः तस्य भावः सत्त्वम् । केवलान्वयि तु चतूरूपोपपन्नमेव स्वसाध्यं साधयितुं क्षमते, तस्य विपक्षविपर्य्ययेण तद्व्यावृत्तिविपर्ययात् केवलव्यतिरेक्यपि तथा, तस्य सपक्षविपर्ययेण तत्सत्त्वविपर्ययादिति । उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वात् हेतुवदाभासन्ते इति हेत्वाभासाः । तत्त्वं च अनुमिति-तत्करणान्तरप्रतिबन्धकयथार्थज्ञानविषयत्वम् । बाधस्थले वह्निरनुष्ण इति अनुमितिप्रतिबन्धकं यत् ज्ञानम् उष्णत्ववद्वह्नौ अनुष्णत्वसाधकं द्रव्यत्वम् इत्याकारकम् तद्विषयत्वस्य विषयतासम्बन्धेन द्रव्यत्वरूपहेत्वाभासे सत्त्वात् लक्षणसमन्वयः । सद्धे-

तुवारणाय यथार्थेति। घटादिवारणाय अनुमितितत्करणेति। व्यभिचारिणि अव्याप्तिवारणाय तत्करणान्यतरेति।

जो वस्तुतः हेतु नहीं है किन्तु हेतु के समान प्रतीत होता है उसे 'हेत्वाभास' कहते हैं। वह ५ प्रकार का है सव्यभिचार, विरुद्ध, सत्प्रतिपक्ष, असिद्ध और बाधित।

सव्यभिचारस्य किं लक्षणं, कतिविधश्च सः ?

सव्यभिचारोऽनैकान्तिकः। स त्रिविधः—साधारणासाधारणानुपसंहारिभेदात्।

अनेकान्तिक को सव्यभिचार कहते हैं। वह ३ प्रकार का होता है—साधारण, असाधारण और अनुपसंहारी।

साधारणस्य किं लक्षणम्।

तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा—पर्वतो वह्निमान् प्रमेयत्वादिति। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्।

पदकृत्यम्

तत्रेति। साधारणादित्रितयमध्ये इत्यर्थः। अथ विरुद्धेऽतिप्रसक्तिरिति मास्म दृश्यः, सपक्षवृत्तित्वस्यापि निवेशात्। अथैवमपि स्वरूपासिद्धेर्दूषणं जागर्त्तीति मा वह गर्वम्, पक्षवृत्तित्वस्यापि तथात्वात्।

साध्याभाव के अधिकरण में रहनेवाले को साधारण अनैकान्तिक कहते हैं। जैसे—'पर्वतो वह्निमान् प्रमेयत्वात्' इस स्थल में जो प्रमेयत्व हेतु है वह साध्याभाव (वह्न्यभाव) के अधिकरण जलादि में भी रहता है। अतः यह हेतु साधारण अनैकान्तिक है।

असाधारणस्य किं लक्षणम् ?

सर्वसपक्षविपक्षव्यावृत्तिरसाधारणः। यथा—शब्दो नित्यः

शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।

पदकृत्यम्

सर्वसपक्षेति। सर्वे ये सपक्षा विपक्षास्तेभ्यो व्यावर्त्तते इति सपक्ष-विपक्षव्यावृत्तः केवलव्यतिरेकवारणाय तद्भिन्न इत्यपि देयम्।

जो हेतु सपक्ष और विपक्षों में न हो, किन्तु केवल पक्ष में ही रहे वह 'असाधारण अनैकान्तिक' कहलाता है, जैसे 'शब्दो नित्यः शब्दत्वात्' इस जगह में शब्दत्व रूप हेतु सभी नित्य और अनित्य पदार्थों में नहीं रहता, अपितु केवल शब्द में ही रहता है। अतः यह हेतु असाधारण है।

अनुपसंहारिणः किं लक्षणम् ?

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि प्रमेयत्वाद दृष्टान्तो नास्ति।

पदकृत्यम्

अन्वयेति। केवलान्वयिनि अतिव्याप्तिवारणाय अन्वयेति। केवल-व्यतिरेकिणि अतिव्याप्तिवारणाय व्यतिरेकेति। अत्रेति। उपदर्शितानु-मान इत्यर्थः।

सभी पदार्थ पक्ष (सर्व) के अन्तर्भूत हैं। अतः कोई भी दृष्टान्त-स्थल नहीं है। अतः यह प्रमेयत्वरूप हेतु अनुपसंहारी अनैकान्तिक है।

विरुद्धस्य किं लक्षणम् ?

साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा—शब्दो नित्यः कृतकत्वादिति। अत्र कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।

पदकृत्यम्

विरुद्धं लक्षयति साध्येति। सद्धेतुवारणाय साध्याभावव्याप्त इति। सत्प्रतिपक्षवारणाय सत्प्रतिपक्षभिन्न इत्यपि बोध्यम्। कृतेति। कार्यत्वा-

दित्यर्थः। व्याप्तमिति यद् यत् कृतकन्तत् तदनित्यम् इति व्याप्तिर्भवत्येव तथेति भावः।

'विरुद्ध हेत्वाभास' वह कहलाता है, जो हेतु सध्याभाव से व्याप्त हो, जैसे—'शब्दो नित्यः कृतकत्वात्, घटवत्' इस स्थल में कृतकत्व रूप हेतु नित्यत्वाभाव अनित्यत्व से व्याप्त है।

सत्प्रतिपक्षस्य किं लक्षणम् ?

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद् घटवत्।

पदकृत्यम्

सत्प्रतिपक्षं लक्षयति। यस्य=हेतोः, साध्याभावसाधकम्=साध्याभावस्यानुमापकम् हेत्वन्तरम्=प्रतिपक्षो हेतुर्विद्यते स हेतुः सत्प्रतिपक्ष इत्यर्थः। अयमेव प्रकरणसम इत्युच्यते। विरुद्धवारणाय हेत्वन्तरं यस्येति। वह्न्यादिवारणाय साध्याभावेति।

सत्प्रतिपक्ष हेत्वाभास वह कहलाता है, जिस हेतु के साध्याभाव का साधक (सिद्ध करनेवाला) दूसरा हेतु हो' जैसे—'शब्दो नित्यः, श्रावणत्वात्, शब्दत्ववत्' इस स्थल में 'शब्दोऽनित्यः, कार्यत्वात् घटवत्, यहाँ कार्यस्वरूप हेतु साध्याभाव का साधक है।

असिद्धः कतिविधः ?

असिद्धस्त्रिविधः—आश्रयासिद्धः स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।

पदकृत्यम्

असिद्धं विभजते असिद्ध इति। आश्रयासिद्धाद्यन्यतमत्वम्।

'असिद्ध' हेत्वाभास के ३ भेद हैं आश्रयसिद्ध, स्वरूपासिद्ध, और व्याप्यत्वासिद्ध।

आश्रयासिद्धः कः ?

आश्रयासिद्धो यथा—गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः स च नास्त्येव ।

पदकृत्यम्

आश्रयसिद्ध इति । आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्त्वम् । भवति हि अरविन्दत्वे गगनीयत्वरूपपक्षतावच्छेदकाभाववत्पक्षकत्वम्, अरविन्दरूपपक्षे गगनीयत्वविरहात् । ननु किम् अरविन्दे गगनीयत्वविरहात् । ननु किम् अरविन्दे गगनीयत्वविरहोऽत आह अत्रेति । उपदर्शितानुमान इत्यर्थः ।

जिस हेतु का आश्रय (पक्ष) अप्रसिद्ध हो उसे 'आश्रयासिद्ध' कहते हैं । जैसे 'गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत्' । इस स्थल में आकाशकमलरूप आश्रय (पक्ष) ही अप्रसिद्ध है; क्योंकि आकाश में कमल होता ही नहीं ।

स्वरूपासिद्धः कः ?

स्वरूपासिद्धो यथा—शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात् ।

पदकृत्यम्

स्वरूपासिद्ध इति । पक्षे हेत्वभावः स्वरूपासिद्धिः । सद्धेत्वभावेऽतिव्याप्तिवारणाय पक्षे इति । घटाद्यभाववारणाय हेत्विति । सोऽयं स्वरूपासिद्धः शुद्धासिद्ध-भागासिद्ध-विशेषणासिद्ध-विशेष्यासिद्धभेदेन चतुर्विधः । तत्र आद्यस्तु उपदर्शित एव : द्वितीयो यथा—उद्भूतरूपादिचतुष्टयं गुणः रूपत्वात् इत्यत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन तस्य भागे स्वरूपासिद्धत्वम् । तृतीयो यथा—वायुः प्रत्यक्षः रूपवत्त्वात् इत्यत्र रूपवत्त्वविशेषणस्य वायाववृत्तेः तद्विशिष्टस्पर्शवत्त्वस्यापि तथात्वेन तस्य स्वरूपासिद्धत्वम् । निर्वहति, विशेषणाभावे विशिष्टस्यापि अभावात् । तुरीयो यथा—

अत्रैव। विशेषणविशेष्यवैपरीत्येन हेतुः। तस्य स्वरूपासिद्धत्वं तु विशेष्याभावप्रयुक्तविशिष्टाभावादिति बोध्यम्।

'स्वरूपासिद्ध' हेतु वह कहलाता है जिसका पक्ष में अभाव हो जैसे 'शब्दो गुणश्चाक्षुषत्वात्' यहाँ पर शब्द में चाक्षुषत्व नहीं है; क्योंकि शब्द तो केवल कानों से ही सुना जाता है। यहाँ शब्दरूप पक्ष में चाक्षुषत्वरूप हेतु असिद्ध है।

व्याप्यत्वासिद्धः कः, किञ्चोपाधिस्वरूपम् ?

सोपाधिको हेतुर्व्याप्यत्वाऽसिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। यथा—पर्वतो धूमवान् वह्निमत्त्वादित्यत्राऽर्द्रेन्धनसंयोग उपाधिः। तथा—यत्र धूमस्तत्रार्द्रेन्धनसंयोगः' इति साध्यव्यापकत्वम्। यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।

पदकृत्यम्

व्याप्यत्वासिद्धं लक्षयति सोपाधिक इति। ननु कोऽयमुपाधिरित्यत आह साध्येति। साधनाव्यापक उपाधिरित्युक्ते शब्दोऽनित्यः कृतकत्वात्, इत्यत्र सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्रहणार्हत्वम् अपि उपाधिः स्यात् तदर्थं साध्यव्यापकत्वमुक्तम्। तावत्युक्ते सामान्यवत्त्वादिनानित्यत्वसाधने कृतकत्वम् उपाधिः स्यात् तदर्थं साधनाव्यापकत्वम् उक्तम्। उपाधिभेदमादाय असम्भववारणाय व्यापकत्वशरीरेऽपि अत्यन्तपदम् आदेयम्। साधनभेदमादाय साधनस्वोपाधित्ववारणाय अव्यापकशरीरेऽपि अत्यन्तपदम् अवश्यं देयम्। सोऽयमुपाधिः त्रिविधः

केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्न-साध्यव्यापकश्चेति। तत्र आद्य उपदर्शितः। एवं क्रत्वन्तर्वर्त्तिनी हिंसा अधर्मजनिका हिंसात्वात् क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः। तस्य यत्राधर्मजनकत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता। यत्र हिंसात्वं तत्र न निषिद्धत्वम् इति निषिद्धत्वमुपाधिः साधनाव्यापकः, क्रतुहिंसायां निषिद्धत्वाभावात्। 'मा हिंस्यात् सर्वा भूतानि' इति सामान्यवाक्यतः 'पशुना यजेत' इत्यादिविशेषवाक्यस्य बलीयस्त्वात्। अतो हिंसात्वं नाधर्मजनकत्वे प्रयोजकम्, अपितु निषिद्धत्वमेवेत्यादिक-मपि द्रष्टव्यम्। द्वितीयो यथा—वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्र उद्भूतरूपवत्त्वम् उपाधिः। तस्य यत्र प्रत्यक्षत्वं तत्र उद्भूतरूप-वत्त्वमिति न केवलसाध्यव्यापकत्वं रूपे व्यभिचारात्। किन्तु द्रव्यत्व-लक्षणो यः पक्षधर्मः तदवच्छिन्नवहिःप्रत्यक्षत्वं यत्र तत्र उद्भूतरूप-वत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव। आत्मनि व्यभिचार-वारणाय बहि पदम्। यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र नोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च, वायौ उद्भूतरूपविरहात्। तृतीयो यथा—ध्वंसो विनाशी जन्यत्वात् इत्यत्र भावत्वमुपाधिः, तस्य यत्र विनाशित्वं तत्र भावत्वं इति न केवलसाध्यव्यापकत्वम्, प्रागभावे भावत्वविरहात्। एवं स श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजन्यत्वम् उपाधिः। श्यामत्वस्य नीलघटेऽपि सत्त्वात् न केवलसाध्यव्यापकत्वं, किन्तु साधना-वच्छिन्नसाध्यव्यापकत्वमेव। अष्टमे पुत्रे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यम्।

जिस हेतु में कोई उपाधि हो उसे सोपाधिक कहते हैं—जो हेतु सोपाधिक होता है उसे व्याप्यत्वासिद्ध कहते हैं। साध्य के अधिकरण में रहने वाले अभाव के अप्रतियोगित्व को साध्यव्यापकत्व कहते हैं। साधन (हेतु) के अधिकरण में रहने वाले अभाव के प्रतियोगित्व को साधनाव्यापकत्व कहते हैं। जैसे 'पर्वतो धूमवान् वह्नेः' यहाँ पर वह्नि हेतु आर्द्रेन्धनसंयोगरूप उपाधि से युक्त

है। जहाँ जहाँ धूम रहता है वहाँ वहाँ आद्रेन्धनसंयोगरूप उपाधि रहती है इससे सिद्ध है कि साध्य (धूम) के अधिकरण में रहने वाला अभाव उपाधि का अभाव तो होगा नहीं, किन्तु घटाभाव ही मिलेगा, उसका प्रतियोगी घट, अप्रति-योगी उपाधि। अतः उपाधि साध्य का व्यापक हो गया। जहाँ-जहाँ वह्नि रहती है वहाँ-वहाँ आर्द्रेन्धनसंयोग नहीं रहता। जैसे अयोगोलक (संतप्त लोहे का गोला) में वह्नि है, आर्द्रेन्धन संयोग नहीं है। अतः आर्द्रेन्धन संयोग का अभाव मिल जाने से उस अभाव का प्रतियोगी आर्द्रेन्धनसंयोग हो गया। अतः आर्द्रेन्धनसंयोग साधन का अव्यापक हो गया। अव्यापक हो जाने से 'धूमवान् वह्नेः' यहाँ पर हेतु वह्नि सोपाधिक बन गया। सोपाधिक हो जाने से वह्नि व्याप्यत्वासिद्ध हेतु हो गया।

बाधितस्य किं लक्षणम् ?

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः, स बाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्रानुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्।

पदकृत्यम्

यस्येति। सद्धेतुवारणाय प्रमाणान्तरेणेति। घटादिवारणाय साध्येति।

'बाधित हेतु वह कहलाता है, जिस हेतु का साध्याभाव प्रमाणान्तर से पक्ष में सिद्ध हो'। यथा—'वह्निः अनुष्णः, द्रव्यत्वात्' इस स्थल में जो अनुष्णत्व का अभाव उष्णत्व है, वह स्पर्श प्रमाण से अग्नि में सिद्ध है। अतः यहाँ द्रव्यत्वरूप हेतु बाधित है। इससे अनुमिति नहीं हो सकती।

इत्यनुमानपरिच्छेदः।

●

उपमानस्य लक्षणं किम् ?

उपमितिकरणमुपमानम्। संज्ञा-संज्ञिसम्बन्धज्ञानमुपमितिः। तत्कारणं सादृश्यज्ञानम्। तथाहि—कश्चिद् गवयपदार्थम-

जानन् कुतश्चिदारण्यकपुरुषात् 'गोसदृशो गवयः' इति श्रुत्वा वनं गतो 'गोसदृशो गवयः' इति वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरमसौ 'अयं गवयशब्दवाच्यः' इत्युपमितिरुत्पद्यते।

पदकृत्यम्

अवसरसङ्गतिमभिप्रेत्य अनुमानानन्तरम् उपमानं निरूपयति उपमितीति। उपमितेः करणम् उपमानमित्यर्थः कुठारादिवारणाय मितीति। प्रत्यक्षादिवारणाय उपेति। संज्ञासंज्ञीति। अनुमित्यादिवारणाय सम्बन्धेति। संयोगादिवारणाय संज्ञासंज्ञीति। वाच्य इति। अभिप्रेतो गवयो गवयपदवाच्य इत्यर्थः। तेन गवयान्तरे शक्तिग्रहाभावप्रसङ्ग इति दूषणमपास्तम्। तथा च गोसादृश्यविशिष्टपिण्डज्ञानं करणम्। अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः। उपमिति फलम् इति सारम्। तच्चोपमानं त्रिविधम्। सादृश्यविशिष्टपिण्डज्ञानम्, असाधारणधर्मविशिष्टपिण्डज्ञानम्, वैधर्म्यविशिष्टपिण्डज्ञानं च। तत्र आद्यम् उक्तमेव द्वितीयं यथा—खड्गमृगः कीदृक् इति पृष्ठे नासिकालसदेकशृंगोऽनतिक्रान्तगजाकृतिश्चेति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशं पिण्डं पश्यन्नतिदेशवाक्यार्थं स्मरति, तदनन्तरं खड्गमृगपदवाच्य इति उपमितिः उत्पद्यते। अत्र नासिकालसदेकशृंग एवं असाधारणधर्मः तृतीयं यथा—उष्ट्रः कीदृक् इति पृष्ठे अश्वादिवदसमानपृष्ठो न ह्रस्वग्रीवशरीरश्चेति आप्तोक्ते कालान्तरे तत्पिण्डदर्शनाद् वैधर्म्यविशिष्टपिण्डज्ञानं ततोऽतिदेशवाक्यार्थस्मरणं तत उष्ट्रः उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते।

उपमिति का करण 'उपमान' कहलाता है। संज्ञा (पद) संज्ञी (अर्थ) इन दोनों का जो शक्तिरूपसम्बन्ध हैं, उसका ज्ञान उपमिति है और उस उपमिति का कारण सादृश्यज्ञान ही उपमान कहलाता है। कोई ग्रामीण मनुष्य, जो कि 'गवय' शब्द का अर्थ नहीं जानता; किन्तु किसी जंगली पुरुष से 'गौ के समान

गवय होता है' यह सुन रखा है, कभी किसी कार्यवश जंगल में जाने पर गोसदृश किसी जन्तु को देख कर उसे 'गोसदृशो गवयः' इस वाक्यार्थ का स्मरण हो आता है। तब उसे 'यह जन्तु गवयशब्दवाच्य है' यह उपमिति होती है।

इत्युपमानपरिच्छेदः।

शब्दप्रमाणस्य किं स्वरूपम् ?

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः यथा गामानयेति। शक्तं पदम्। 'अस्मात् पदादयमर्थो बोद्धव्यः' इतीश्वरसंकेतः शक्तिः।

पदकृत्यम्

अवसरसंगतिमभिप्रेत्योपमानानन्तरं शब्दं निरूपयति आप्तेति। शब्द इति। शब्दप्रमाणमित्यर्थः। भ्रान्तविप्रलम्भकयोर्वाक्यस्य शब्दप्रमाणत्ववारणाय आप्तेति। ननु कोऽयमाप्त इत्यत आह आप्तस्त्विति। यथार्थवक्ता=यथाभूताबाधितार्थोपदेष्टा। वाक्यं लक्षयति वाक्यमिति। घटादिसमूहवारणाय पदेति। शक्तमिति निरूपकतासम्बन्धेन शक्तिविशिष्टमित्यर्थः। अस्मादिति। 'घटरूपोऽर्थो बोद्धव्यः' इतीश्वरेच्छैव शक्तिरित्यर्थः। अर्थस्मृत्यनुकूलपदार्थसम्बन्धत्वं तल्लक्षणम्। शक्तिरिव लक्षणापि पदवृत्तिः। अथ केयं लक्षणा ? शक्यसम्बन्धो लक्षणा। सा च त्रिधा जहत्-अजहत्-जहदजहद्भेदात्। वर्त्तते च गंगायां घोष इत्यत्र गंगापदशक्यप्रवाहसम्बन्धस्तीरे। लक्षणाबीजं च तात्पर्यानुपपत्तिः। अतएव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणा सेत्स्यति। 'छत्रिणो यान्ति' इत्यादौ द्वितीया। 'सोऽयमश्व' इत्यादौ तृतीया।

'आप्त (यथार्थवक्ता, शिष्ट) पुरुषों के उच्चरित वाक्य को 'शब्दप्रमाण' कहते हैं। पदों के समूह को वाक्य कहते हैं। जैसे—गाम् आनय' (गाय को लाओ) यह वाक्य कहलाता है। जिसमें शक्ति हो वह पद कहलाता है 'इस पद से यह अर्थ समझना चाहिए' इस प्रकार के ईश्वरीय संकेत (इच्छा) को ही शक्ति कहते हैं।

वाक्यार्थज्ञाने के हेतवः, कानि च तेषां लक्षणानि ?

आकांक्षा-योग्यता-सन्निधिश्च वाक्यार्थज्ञाने हेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा; अर्थाबाधो योग्यता, पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकांक्षादिरहितं वाक्यमप्रमाणम्। यथा—गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकांक्षाविरहात्। 'वह्निना सिञ्चती' ति न प्रमाणम्, योग्यताविरहात्। प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणम्, सान्निध्याभावात्।

पदकृत्यम्

पदस्येति। असम्भववारणाय पदान्तरव्यतिरेकप्रयुक्त इति। पुनरसम्भववारणाय पदान्तरेति। अर्थेति। आकांक्षावारणाय अर्थेति। पदानामिति। असहोच्चारितेषु अतिव्याप्तिवारणाय अविलम्बेनेति। आकांक्षावारणाय पदानामिति। आकाङ्क्षादिशून्यवाक्यस्यात्र प्रमात्वं निषेधयति तथा चेति। आकाङ्क्षादिदिकं शाब्दहेतुरित्युक्ते चेत्यर्थः। आकाङ्क्षाद्युदाहरणं दर्शयति अर्थेति।

वाक्यार्थज्ञान (शाब्दबोध) में आकांक्षा, योग्यता और सन्निधि—ये तीन प्रकार के कारण हैं; पद में किसी दूसरे पद के अभाव से प्रयुक्त शाब्दबोध जनकता ही 'आकांक्षा' है। अर्थात्—जिस पद के बिना जिस पद का शाब्दबोध

नहीं हो सकता हो उसे आकांक्षा कहते हैं—गामानय इस वाक्य में 'गो' पद का शाब्दबोध 'अम्' पद के बिना नहीं होता, क्योंकि 'गो आनय' इस वाक्य से अर्थ प्रतीत होता ही नहीं है। अतः 'गामानय' इस वाक्य से अर्थज्ञान (शाब्दबोध) में गोपदोत्तर अम्पदत्वरूप आकांक्षा कारण है। 'अर्थ के बाधाभाव' को योग्यता कहते हैं। एक पदार्थ से दूसरे का सम्बन्ध बाधित न होना योग्यता है। जैसे—'वह्निना सिञ्चति' यहाँ सिंचन करने की योग्यता अग्नि में नहीं है; क्योंकि आग से सिंचन नहीं होता है, अतः इस वाक्य से शाब्दबोध नहीं हो सकता। पदों का अविलम्ब (शीघ्रता से) उच्चारण करना ही 'सन्निधि' है। आकांक्षा, योग्यता और सन्निधि से रहित जो वाक्य है, वह प्रमाण नहीं होता। जैसे 'गाय, घोड़ा, पुरुष, हाथी' यह वाक्य प्रमाण नहीं है, क्योंकि इस वाक्य में शब्दों की परस्पर कोई आकांक्षा नहीं है। 'अग्नि से सींचता है' यह वाक्य भी प्रमाण नहीं है, क्योंकि इसमें योग्यता नहीं है। एव एक-एक पहर के बाद उच्चारित किये 'गाम्' 'आनय' इत्यादि पद भी प्रमाण नहीं हैं, क्योंकि इनमें सन्निधि नहीं है।

वाक्यं कतिविधम् ?

वाक्यं द्विविधम्—वैदिकं—लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तम् प्रमाणम्। अन्यदप्रमाणम्।

वाक्य दो प्रकार के होते हैं। एक वैदिक दूसरा लौकिक। वैदिक (वेदरूप) वाक्य ईश्वर के वाक्य हैं, अतः वे सभी वैदिक वाक्य प्रमाण हैं। और लौकिक (मनुष्य से उक्त) वाक्य वे ही प्रमाण हैं, जो यथार्थवक्ता से उच्चरित हों, उनसे अन्य (मिथ्यावादियों से उक्त) लौकिक वाक्य प्रमाण नहीं है।

शाब्दज्ञानं किम् ?

वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं तु शब्दः।

पदकृत्यम्

ननु एतावता शाब्दसामग्री प्रपञ्चिता, प्रमाविभाजकवाक्ये शाब्दस्यापि उद्दिष्टत्वेन तत् कुतो न प्रदर्शितम् इत्यत आह वाक्यार्थेति। शाब्दत्वं च शब्दात् प्रत्येमि इत्यनुभवसिद्धा जातिः। शाब्दबोधक्रमो यथा—'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामकर्मकगमनानुकूलवर्तमानकृतिमांश्चैत्र इति शाब्दबोधः। द्वितीयायाः कर्मत्वम् अर्थः, धातोर्गमनम्, कृतिः तत्सम्बन्धः संसर्गमर्यादया भासते। 'रथो गच्छति' इत्यत्र गमनानुकूलव्यापारवान् इति शाब्दबोधः। 'स्नात्वा गच्छति' इत्यत्र गमनप्रागभावावच्छिन्नकालीनस्नानकर्ता गमनानुकूलवर्तमानकृतिमानिति शाब्दबोधः। क्त्वाप्रत्ययस्य कर्त्ता, पूर्वकालीनत्वं चार्थः। एवमन्यत्रापि वाक्यार्थो बोध्यः।

वाक्यके अर्थको समझना ही शाब्दज्ञान (शाब्दबोध) है। उस शाब्दज्ञान का (असाधारण कारण) शब्द है। अतः शाब्द ही शब्द प्रमाण है।

इति शब्दपरिच्छेदः।

अयथार्थानुभवस्य कति भेदाः ?

अयथार्थानुभवस्त्रिविधः—संशय-विपर्यय-तर्कभेदात्।

संशय, विपर्यय और तर्क भेद से 'अयथार्थ अनुभव' ३ प्रकार का है।

संशयस्य किं लक्षणम् ? किञ्चोदाहरणम् ?

एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः। यथा—स्थाणुर्वा पुरुषो वेति।

पदकृत्यम्

संशयं लक्षयति एकेति। एकस्मिन् धर्मिणि = एकस्मिन्नेव पुरोवर्त्तिनि पदार्थे, विरुद्धा = व्यधिकरणाः नानाधर्माः स्थाणुत्व-पुरुषत्वादयः तेषां वैशिष्ट्यम् = सम्बन्धः, तदवगाहि ज्ञानं संशय इत्यर्थः। घटपटौ इति समूहालम्बनज्ञानस्य घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिवारणाय एकस्मिन्निति। घटः पृथिवी इति ज्ञानस्य एकस्मिन् धर्मिणि घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिवारणाय विरुद्धेति। पटत्वविरुद्धघटत्ववान् घट इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति।

एक धर्मी मे परस्पर विरुद्ध नाना धर्मों के सम्बन्ध से होनेवाला ज्ञान ही 'संशय' है। जैसे—किसी एक 'विशेष्य' स्थाणु (शाखा-पत्र-विहीन वृक्ष) को देखकर उसमें सन्देह होता है कि यह 'स्थाणु' है अथवा 'पुरुष' है। यहाँ एक ही स्थाणुरूप विशेष्य में स्थाणुत्व और स्थाणुत्वका अभाव तथा पुरुषत्व और पुरुषत्वाभाव रूप विरुद्ध धर्म का अवगाहन होने से यह संशय ज्ञान हुआ।

विपर्ययस्य किं लक्षणम्? किञ्चोदाहरणम्?

मिथ्याज्ञानं विपर्ययः। यथा—'शुक्तौ रजतम्'।

पदकृत्यम्

यथार्थज्ञानवारणाय मिथ्येति। अयथार्थवारणाय ज्ञानेति।

मिथ्याज्ञान 'विपर्यय' कहलाता है। जैसे—सीप में 'यह चाँदी है' ऐसा ज्ञान मिथ्या ज्ञान है।

तर्कस्य किं स्वरूपम्?

व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा—'यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्' इति।

पदकृत्यम्

व्याप्येति । असम्भवदारणाय व्याप्यारोपेणेति । पुनरसम्भववारणाय व्यापकारोप इति । अत्र वह्न्यभावो व्याप्यः, धूमाभावो व्यापकः । यद्यपि तर्कस्य विपर्ययात्मकत्वे पृथग् विभागोऽनुचितः, तथापि प्रमाणानुग्राहकत्वात् स उदित इति बोध्यम् । स्वप्नस्तु पुरीततबहिर्देशान्तर्देशयोः सन्धौ इडानाड्यां वा मनसि स्थितेऽदृष्टविशेषेण धातुदोषेण वा जन्यते सच्च मानसविपर्य्ययान्तर्भूतः ।

व्याप्य के आरोप (अपादान) से व्यापक का आरोप (अपादान) करना 'तर्क' कहलाता है । जैसे—'यदि अग्नि न होगा तो धूम भी न होगा'—यहाँ वह्न्यभावरूप व्याप्य के ज्ञान से धूमाभावरूप व्यापक का ज्ञान करना ही तर्क है ।

स्मृतिः कतिविधा ?

स्मृतिरपि द्विविधा—यथार्था अयथार्था चेति । प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था ।

स्मृति भी २ प्रकार की होती है—यथार्थ और अयथार्थ । प्रमा (यथार्थ-ज्ञान) से जो स्मृति हो वह यथार्थ और अप्रमा (भ्रम) से होने वाली स्मृति अयथार्थ स्मृति कहलाती है ।

सुखस्य किं लक्षणम् ?

सर्वेषामनुकूलवेदनीयं सुखम् ।

सुखं निरूपयति सर्वेषामिति । सर्वात्मनामनुकूलमिति वेद्यं यत् तत्सुखमित्यर्थः 'अहं सुखी' इत्यनुभवसिद्धसुखत्वजातिमत्, धर्ममात्रासाधारणकारणो गुणो वा सुखम् । शत्रुदुःखवारणाय सर्वेषामिति ।

जो सभी प्राणियों का प्रियजनक हो वह 'सुख' है ।

दुःखस्य किं लक्षणम् ?

प्रतिकूलवेदनीयं दुःखम् ।

पदकृत्यम्

दुःखं निरूपयति । दुःखत्वजातिमत्, अधर्ममात्रासाधारणो गुणो वा दुःखम् । शेषं पूर्ववत् ।

जो सभी प्राणियों का अप्रियजनक हो वह 'दुःख' है ।

इच्छा-द्वेष-प्रयत्नानां कानि लक्षणानि ?

इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।

इच्छां निरूपयति । काम इति पर्यायः । इच्छात्वजातिमती इच्छा । सा द्विधा फलेच्छा उपायेच्छा च । फलं सुखादिकम्, उपायो योगादिः । क्रोध इति द्वेष इत्यनुभवसिद्धद्वेषत्वजातिमान् द्विष्टसाधनताज्ञानजन्य-गुणो वा द्वेषः । प्रयत्नं निरूपयति कृतिरिति । प्रयत्नत्वजातिमान् प्रयत्नः । स त्रिविधः प्रवृत्ति-निवृत्ति-जीवनयोनिभेदात् । इच्छाजन्यो गुणः प्रवृत्तिः द्वेषजन्यो गुणः निवृत्तिः । जीवनादृष्टजन्यो गुणो जीवन-योनिः । स च प्राणसञ्चारकारणम् ।

इच्छा का नाम 'काम' है । क्रोध का नाम 'द्वेष' है । 'कृति' यत्न (उद्योग) को कहते हैं ।

धर्माधर्मयोः किं लक्षणम् ?

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।

पदकृत्यम्

धर्ममाह विहितेति । वेदविहितेत्यर्थः । अधर्मवारणाय वेदविहितेति । योगादिक्रियावारणाय कर्मजन्य इति । सच कर्मनाशाजलस्पर्शकर्त्तृ-भोगतत्त्वज्ञानादिना नश्यति । अधर्मलक्षणमाह निषिद्धेति । वेदेनेत्यर्थः । धर्मवारणाय वेदनिषिद्धेति । वेदनिषिद्धक्रियावारणाय धर्मजन्य इति । सच भोगप्रायश्चित्तादिना नश्यति । एतावेव अदृष्टमिति कथ्येते, वासनाजन्यौ च । वासना च विलक्षणसंस्कारः ।

वेदविहित कर्म से उत्पन्न अदृष्ट को 'धर्म' कहते हैं, और वेदनिषिद्ध कर्म से उत्पन्न अदृष्ट को 'अधर्म कहते हैं।

आत्ममात्रविशेषगुणाः के ?

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्याः अनित्याश्च। नित्या ईश्वरस्य, अनित्या जीवस्य।

आत्मा के आठ विशेष गुण हैं—बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म और अधर्म। इनमें से बुद्धि, इच्छा, और प्रयत्न ये तीनों दो-दो प्रकार के हैं। नित्य और अनित्य। ईश्वर की बुद्धि, इच्छा, तथा प्रयत्न नित्य हैं, और जीव की बुद्धि, इच्छा, तथा प्रयत्न अनित्य हैं।

संस्कारः कतिविधः ? तद्भेदाश्च किंस्वरूपा. ?

संस्कारस्त्रिविधः—वेगो भावना स्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः।

पदकृत्यम्

संस्कारं विभजते संस्कारेति। सामान्यगुणात्मविशेषणगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः। घटादिवारणाय गुणत्वव्याप्येति। संयोगादिवारणाय आत्मविशेषगुणोभयवृत्तीति। ज्ञानादिवारणाय सामान्येति। द्वितीयादिपतनासमवायिकारणं वेगः। रूपादिवारणाय द्वितीयादिपतनेति। कालादिवारणाय असमवायीति। भावनां लक्षयति अनुभवेति। आत्मादिवारणाय प्रथमदलम्। अनुभवध्वंसवारणाय द्वितीयदलम्। स्थितिस्थापकमाह अन्यथेति। पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वं स्थितिस्थापकत्वम्। गन्धवत्त्वमादाय गन्धेऽतिव्याप्तिवारणाय संस्कारत्वव्याप्येति। भावनात्वमादाय भावनावारणाय पृथिवीसमवेतेति।

स्थितिस्थापकरूपान्यतरत्वमादाय रूपवारणाय जातीति। गुणा इति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणदलम्। सामान्यादावतिव्याप्तिवारणाय विशेष्यदलम्।

संस्कार तीन प्रकार के हैं—वेग, भावना और स्थितिस्थापक। इनमें 'वेग' रूप संस्कार पृथिवी, जल, तेज, वायु और मन इन पाँचों में हैं। अनुभव से उत्पन्न और स्मरण का कारण भावनारूप संस्कार केवल आत्मा में ही रहता है। 'स्थितिस्थापक' रूप संस्कार (दूसरी अवस्था में की गयी वस्तु को पुनः अपनी अवस्था में लाने वाला संस्कार) चटाई आदि पार्थिव पदार्थों में रहता है (अर्थात् चटाई को मोड़ देने पर पुनः वह खुलकर पहले जैसी बन जाती है।)

इति गुणनिरूपणम्

□

कर्मणः किं लक्षणम्

चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।

पदकृत्यम्

चलनेति। संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म। हस्तपुस्तकवारणाय सत्यन्तम्। घटादिवारणाय विशेष्यदलम्। ऊर्ध्वेति अपक्षेपणवारणाय। कालादिवारणाय असाधारणेत्यपि बोध्यम्। अधोदेशेति उत्क्षेपणवारणाय। कालादिवारणाय असाधारणेत्यपि देयम्। प्रसारणादिवारणाय शरीरसन्निकृष्टेति। कालादिवारणाय असाधारणेत्यपि। उत्क्षेपणादिवारणाय विप्रकृष्टेति। कालादिवारणाय असाधारणमित्यपि आवश्यकम्।

चलने-फिरने आदि क्रिया का नाम 'कर्म' है। ऊर्ध्वदेश (ऊपर भाग) में संयोग का कारण 'उत्क्षेपण' (ऊपर फेंकना) है, और अधोदेश (नीचे का भाग) में संयोग का कारण 'अपक्षेपण' (नीचे फेंकना) है। शरीर के सन्निकृष्टसंयोग का कारण 'आकुञ्चन' (समेटना) है, तथा शरीर से दूरस्थ संयोग का कारण 'प्रसारण' (फैलाना) है, इनसे भिन्न सभी कर्मों को 'गमन' (जाना) कहते हैं।

सामान्यस्य किं लक्षणम् ? कतिविधञ्च तत् ?

नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। तद् द्विविधं परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि।

पदकृत्यम्

नित्यमिति। संयोगादिवारणाय नित्यमिति। कालादिपरिमाणवारणाय अनेकेति। अनेकानुगतत्वं च समवायेन बोध्यम्। तेन नात्यन्ताभावेऽतिव्याप्तिः।

नित्य और एक होता हुआ भी जो अनेक पदार्थों में समवायसम्बन्ध से रहनेवाला हो उसे सामान्य (जाति) कहते हैं। वह द्रव्य, गुण और कर्म में रहता है। वह पर, अपर भेद से दो तरह का है। अधिक देश में व्यापक होकर रहनेवाली जाति सत्ता है। अतः सत्ता पर सामान्य है। द्रव्यत्व आदि जाति सत्ता से कम देश में रहती है अतः द्रव्यत्व अपर सामान्य है।

विशेषाणां किं लक्षणम् ?

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।

पदकृत्यम्

नित्येति। घटत्वादिवारणाय नित्यद्रव्यवृत्तय इति। आत्मत्वमनस्त्ववारणाय आत्मत्वमनस्त्वभिन्ना इत्यपि बोध्यम्।

'विशेष' वह पदार्थ है जो नित्य द्रव्यों में रहता हुआ दूसरों का व्यावर्तक (भेदक) हो।

समवायस्य किं लक्षणम ?

नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेववतिष्ठते तावयुतसिद्धौ यथा अवयवावयविनौ गुणगुणिनौ क्रिया-क्रियावन्तौ जाति-व्यक्ती, विशेष-नित्यद्रव्ये चेति।

पदकृत्यम्

नित्येति। आकाशादिवारणाय सम्बन्ध इति। संयोगवारणाय नित्येति। स्वरूपसम्बन्धवारणाय तद्भिन्न इत्यपि बोध्यम्।

नित्य सम्बन्ध का नाम 'समवाय' है। यह समवाय अयुतसिद्ध पदार्थों में रहता है। जिन वस्तुओं में से एक नष्ट न होता हुआ दूसरे पदार्थ पर आश्रित रहे ऐसे दोनों को अयुतसिद्ध कहते हैं। जैसे—अवयव और अवयवी, गुण और गुणी (द्रव्य), क्रिया और क्रियावान्, जाति और व्यक्ति विशष और नित्यद्रव्य।

प्रागभावस्य किं लक्षणम् ?

अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य।

पदकृत्यम्

प्रागभावं लक्षयति। घटादिवारणाय प्रथमदलम्। परमाणुवारणाय द्वितीयदलम्। पुनः प्रागभावः कस्मिन् कालेऽस्ति इत्यत आह उत्पत्तेरिति। कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारणे वर्तत इत्यर्थः।

जिस अभाव की उत्पत्ति नहीं हो, पर अन्त (नाश) होता हो उसे 'प्रागभाव' कहते हैं। जैसे—घटादि की उत्पत्ति के पहिले जो उनका अभाव (कपालादि में) है वह 'प्रागभाव' है, क्योंकि इसकी उत्पत्ति नहीं होती, किन्तु घटाद्युत्पत्ति के बाद उसका नाश हो जाता है।

प्रध्वंसाभावस्य किं लक्षणम् ?

सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य।

पदकृत्यम्

ध्वंसं लक्षयति सादिरिति । घटादिवारणाय अनन्त इति । आत्मादिवारणाय सादिरिति । उत्पत्तीति । कार्यस्य उत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिः इत्यर्थः । स च ध्वस्तः इति प्रत्ययविषयः ।

जिस अभाव का आदि (उत्पत्ति) हो, किन्तु अन्त (ध्वंस) नहीं होता हो, वह 'प्रध्वंसाभाव' कहलाता है । जैसे-घट की उत्पत्ति के पश्चात् जो अभाव (कपाल में) है वह 'प्रध्वंसाभाव' है; क्योंकि घटोत्पत्ति के बाद घटध्वंसाभाव उत्पन्न होता है, किन्तु इसका अन्त नहीं होता ।

अत्यन्ताभावस्य किं लक्षणम् ?

त्रैकालिकसंसर्गावच्छिन्न-प्रतियोगिताकोऽत्यन्ताभावः । यथा-भूतले घटो नास्तीति ।

पदकृत्यम्

अत्यन्ताभावं लक्षयति । त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकोऽभावः ध्वंसप्रागभाववारणाय त्रैकालिकेति । भेदवारणाय संसर्गेत्यादि ।

'अत्यन्ताभाव' वह कहलाता है जिस अभाव की प्रतियोगिता संसर्ग से युक्त हो, तथा जो तीनों कालों में रहता हो—'जैसे पृथिवी पर घट नहीं है' इस तरह का अभाव ।

अन्योऽन्याभावस्य किं लक्षणम् ?

तादात्म्यसम्बन्धावच्छिन्न-प्रतियोगिताकोऽन्योन्याभावः । यथा—'घटः पटो न' इति ।

पदकृत्यम्

अन्योन्याभावं लक्षयति । प्रागभावप्रध्वंसाभाववारणाय तादात्म्येति । अत्यन्ताभाववारणाय तादात्म्यत्वेन सम्बन्धो विशेषणीयः ।

जिसकी प्रतियोगिता तादात्म्य (अभेद) सम्बन्ध से युक्त हो, वह 'अन्योन्याभाव' कहलाता है । जैसे 'घट पट नहीं है' इस तरह का अभाव ।

अथ पदार्थोपसंहारः

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ।

पदकृत्यम्

पदार्थज्ञानस्य परमं प्रयोजनं मोक्ष इत्यामनन्ति । स च आत्यन्तिकैकविंशतिदुःखध्वंसः । आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम् । दुःखध्वंसस्य इदानीमपि सत्त्वेन अस्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनान्तम् । मुक्त्यात्मकदुःखध्वंसस्य अन्यदीयदुःखप्रागभावसमानकालीनत्वात् वामदेवादीनां मुक्तात्मनामपि अमुक्तत्वप्रसङ्गात् स्वसमानाधिकरणेति । प्रागभावविशेषणम् । दुःखानि चैकविंशतिः-शरीरम्, षड् इन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं दुःखं च । दुःखानुषङ्गित्वात् शरीरादौ गौणदुःखत्वम् । तथा च 'आत्मा वाऽरे द्रष्टव्यः' इति श्रुतेः आत्मज्ञानसाधन-निदिध्यासनमननसाधनत्वं पदार्थज्ञाने संजाघटीति । एवं च तत्त्वज्ञाने सति शरीरपुत्रादौ आत्मत्वस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः, तेन दोषाभावः, तेन प्रवृत्त्यनुत्पत्तिः ततः तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः ततो जन्माभावः ।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ।
अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः ।

इत्यादिवचनात् 'तमेव विदित्वाऽति मृत्युमेति' इति श्रुतेश्च सगुणोपासनकाशीमरणादेरपि तत्त्वज्ञानद्वारा मुक्तिहेतुत्वम् । अत एव परमेश्वरः काश्यां तारकमुपदिशतीति सारम् ।

चक्रे चन्द्रजसिंहो हि पदकृत्यमिदं शुभम् ।
परोपकारकरणान्माधवो वीक्षतामिदम् ॥

॥ इति चन्द्रजसिंहकृतं पदकृत्यं परिसमाप्तम् ॥

'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इस सूत्रके अनुसार न्यायदर्शन में—१ प्रमाण, २ प्रमेय, ३ संशय, ४ प्रयोजन, ५ दृष्टान्त, ६ सिद्धान्त, ७ अवयव, ८ तर्क, ९ निर्णय, १० वाद, ११ जल्प, १२ वितण्डा, १३ हत्वाभास, १४ छल, १५ जाति और १६ निग्रहस्थान ये पदार्थ माने गये हैं, किन्तु वैशेषिक दर्शन में ७ हीं पदार्थ माने जाते हैं, क्योंकि न्यायदर्शनोक्त सभी पदार्थों का अन्तर्भाव पूर्वोक्त द्रव्य आदि ७ पदार्थों में ही हो जाता है। अतः आरम्भ में जिन ७ पदार्थों की प्रतिज्ञा की गई थी वे ७ पदार्थ सिद्ध हुए।

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः॥
इति श्रीमहामहोपाध्यायाऽन्नंभट्टविरचितस्तर्कसंग्रहः समाप्तः॥

काणाद (वैशेषिक) और न्याय (गौतम) के मतों का बालकों को सुख से ज्ञान कराने के लिए विद्वान् अन्नंभट्ट ने इस तर्कसंग्रह की रचना की है।

इति श्रीकृष्णमणित्रिपाठिकृता हिन्दीटीका समाप्ता।

हमारे महत्त्वपूर्ण छात्रोपयोगी प्रकाशन

[जिनमें मूलपाठ के साथ संस्कृत-हिन्दी टीका, भूमिका, नोट्स एवं अन्य छात्रोपयोगी सामग्री है]

अभिज्ञानशाकुन्तलम्	सुबोधचन्द्र पन्त
उत्तररामचरित	आनन्दस्वरूप
कादम्बरी (कथामुख)	रतिनाथ झा
काव्यदीपिका	परमेश्वरानन्द
किरातार्जुनीय (१-४ सर्ग)	जनार्दन शास्त्री पाण्डेय
चन्द्रालोक	सुबोधचन्द्र पन्त
नागानन्द	संसारचन्द्र
प्रतिमानाटक	श्रीधरानन्द शास्त्री
नीतिशतक	जनार्दन शास्त्री पाण्डेय
प्रसन्नराघव	रमाशंकर त्रिपाठी
बालचरित	कमलेशदत्त त्रिपाठी
भट्टिकाव्यम् (१-४ सर्ग)	राम अवध पाण्डेय
भट्टिकाव्यम् (५-८ सर्ग)	रामगोविन्द शुक्ल
मृच्छकटिकम्	रमाशंकर त्रिपाठी
मालविकाग्निमित्र	संसारचन्द्र
मेघदूत (सम्पूर्ण)	संसारचन्द्र
रघुवंश महाकाव्य (सम्पूर्ण)	धारादत्त शास्त्री
रत्नावली	रमाशंकर त्रिपाठी
वेणीसंहार	रमाशंकर त्रिपाठी
शान्तिस्वस्तिपाठः	सुषमा पाण्डेय
शिशुपालवध (१-४ सर्ग)	जनार्दन शास्त्री पाण्डेय
शुनःशेपोपाख्यानम्	सुषमा पाण्डेय
श्रुतबोधः	सुषमा पाण्डेय
स्वप्नवासवदत्त	जयपाल विद्यालंकार
साहित्यदर्पण	शालिग्राम शास्त्री
सौन्दरनन्दकाव्य	सूर्यनारायण चौधरी
हितोपदेश-मित्रलाभः	विश्वनाथ झा

मोतीलाल बनारसीदास

दिल्ली, मुम्बई, चेन्नई, कलकत्ता, बंगलौर,
वाराणसी, पुणे, पटना

मूल्य : रु० १५